# Vedanta Paribhasha

# વેદાન્ત પરિભાષા

## Document Information

Text title : Vedanta Paribhasha

File name : paribhasha.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Dharmaraja Adhvarindra

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Translated by : -

Latest update : March 8, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Vedanta Paribhasha

# વેદાન્ત પરિભાષા

by Dharmaraja Adhvarindra


૧ પ્રત્યક્ષ પ્રમાણમ્ ।

૨ અનુમાનમ્ ।

૩ ઉપમાનમ્ ।

૪ આગમઃ ।

૫ અર્થાપત્તિઃ ।

૬ અનુપલબ્ધિ ।

૭ પ્રામાણ્યમ્ ।

૮ પ્રયોજનમ્ ।


---

## ૧ પ્રત્યક્ષ પ્રમાણમ્ ।

યદવિદ્યાવિલાસેન ભૂતભૌતિકસૃષ્ટયઃ ।
તં નૌમિ પરમાત્માનં સચ્ચિદાનન્દવિગ્રહમ્ ॥ ૧॥

યદન્તેવાસિપઞ્ચાસ્યૈર્નિરસ્તા ભેદિવારણાઃ ।
તં પ્રણૌમિ નૃસિંહાખ્યં યતીન્દ્રં પરમં ગુરુમ્ ॥ ૨॥

શ્રીમદ્વેઙ્કટનાથાખ્યાન્ વેલાઙ્ગુડિનિવાસિનઃ ।
જગદ્ગુરૂનહં વન્દે સર્વતન્ત્રપ્રવર્તકાન્ ॥ ૩॥

યેન ચિન્તામણૌ ટીકા દશટીકાવિભઞ્જિની ।
તર્કચૂડામણિર્નામ કૃતા વિદ્વન્મનોરમા ॥ ૪॥

ટીકા શશધરસ્યાપિ બાલવ્યુત્પત્તિદાયિની ।
પદયોજનયા પઞ્ચપાદિકા વ્યાકૃતા તથા ॥ ૫॥

તેન બોધાય મન્દાનાં વેદાન્તાર્થાવલમ્બિની ।
ધર્મરાજાધ્વરીન્દ્રેણ પરિભાષા વિતન્યતે ॥ ૬॥

ઇહ ખલુ ધર્માર્થકામમોક્ષાખ્યેષુ ચતુર્વિધપુરુષાર્થેષુ
મોક્ષ એવ પરમપુરુષાર્થઃ, "ન સ પુનરાવર્તતે"
ઇત્યાદિશ્રુત્યા તસ્યૈવ નિત્યત્વાવગમાત્, ઇતરેષાં ત્રયાણાં પ્રત્યક્ષેણ,
"તદ્યથેહ કર્મજિતો લોકઃ ક્ષીયતે, એવમેવામુત્ર પુણ્યજિતો લોકઃ ક્ષીયતે"
ઇત્યાદિશ્રુત્યા ચ અનિત્યત્વાવગમાચ્ચ । સ ચ બ્રહ્માજ્ઞાનાદિતિ
બ્રહ્મ તજ્જ્ઞાનં તત્પ્રમાણઞ્ચ સપ્રપઞ્ચં નિરૂપ્યતે ।

તત્ર પ્રમાકરણં પ્રમાણમ્ । તત્ર સ્મૃતિવ્યાવૃત્તં
પ્રમાત્વમનધિગતાવાધિતાર્થવિષયકજ્ઞાનત્વમ્ ।
સ્મૃતિસાધારણન્તુ અવાધિતાર્થવિષયકજ્ઞાનત્વમ્ ।
નીરૂપસ્યાપિ કાલસ્યેન્દ્રિયવેદ્યત્વાભ્યુપગમેન, ધારાવાહિકબુદ્ધેરપિ
પૂર્વપૂર્વજ્ઞાનાવિષય-તત્તત્ક્ષણવિશેષવિષયકત્વેન ન
તત્રાવ્યાપ્તિઃ । કિઞ્ચ સિદ્ધાન્તે ધારાવાહિકબુદ્ધિસ્થલે ન
જ્ઞાનભેદઃ, કિન્તુ યાવદ્ઘટસ્ફુરણં
તાવદ્ઘટાકારાન્તઃકરણવૃત્તિરેકૈવ,
ન તુ નાના, વૃત્તેઃ સ્વવિરોધિવૃત્ત્યુત્પત્તિપર્યન્તં
સ્થાયિત્વાભ્યુપગમાત્; તથા ચ તત્પ્રતિફલિતચૈતન્યરૂપં
ઘટાદિજ્ઞાનમપિ તત્ર તાવત્કાલીનમેકમેવ ઇતિ નાવ્યાપ્તિશઙ્કાપિ ।

નનુ સિદ્ધાન્તે ઘટાદેર્મિથ્યાત્વેન બાધિતત્વાત્ કથં તજ્જ્ઞાનં પ્રમાણમ્ ?
ઉચ્યતે । બ્રહ્મસાક્ષાત્કારાનન્તરં હિ ઘટાદીનાં બાધઃ, "યત્ર
ત્વસ્ય સર્વમાત્મૈવાભૂત્ તત્ કેન કં પશ્યેત્"
ઇતિ શ્રુતેઃ । ન તુ સંસારદશાયાં બાધઃ, "યત્ર હિ દ્વૈતમિવ ભવતિ
તદિતર ઇતરં પશ્યતિ" ઇતિ શ્રુતેઃ । તથા ચ 'અબાધિત' - પદેન
સંસારદશાયામબાધિતત્વં
વિવક્ષિતમ્, ઇતિ ન ઘટાદિપ્રમાયમવ્યાપ્તિઃ । તદુક્તમ્ -
"દેહાત્મપ્રત્યયો યદ્વત્ પ્રમાણત્વેન કલ્પિતઃ ।
લૌકિકં તદ્વદેવેદં પ્રમાણાન્ત્વાઽઽત્મનિશ્ચયાત્ ॥" ઇતિ ।
'આ આત્મનિશ્ચયાત્'-બ્રહ્મસાક્ષાત્કારપર્યન્તમિત્યર્થઃ।
'લૌકિકમ્' ઇતિ ઘટાદિજ્ઞાનમિત્યર્થઃ ।

તાનિ ચ પ્રમાણાનિ ષટ્ - પ્રત્યક્ષાનુમાનોપમાનાગમ-
અર્થાપત્તિઅનુપલબ્ધિભેદાત્ । તત્ર પ્રત્યક્ષપ્રમાયાઃ કરણં
પ્રત્યક્ષપ્રમાણમ્ । પ્રત્યક્ષપ્રમા ચાત્ર ચૈતન્યમેવ,

"યત્ સાક્ષાદપરોક્ષાદ્ બ્રહ્મ" ઇતિ શ્રુતેઃ ।
'અપરોક્ષાદિ'ત્યસ્ય અપરોક્ષમિત્યર્થઃ ।

નનુ ચૈતન્યમનાદિ તત્ કથં ચક્ષુરાદેસ્તત્કરણત્વેન
પ્રમાણત્વમિતિ । ઉચ્યતે । ચૈતન્યસ્યાનાદિત્વેઽપિ
તદભિવ્યઞ્જક- અન્તઃકરણવૃત્તિરિન્દ્રિયસન્નિકર્ષાદિના
જાયતે ઇતિ વૃત્તિવિશિષ્ટં ચૈતન્યમાદિમદિત્યુચ્યતે
જ્ઞાનાવચ્છેદકત્વાચ્ચ વૃત્તૌ જ્ઞાનત્વોપચારઃ ।
તદુક્તં વિવરણે "અન્તઃકરણવૃત્તૌ જ્ઞાનત્વોપચારાત્"।

નનુ નિરવયવસ્યાન્તઃકરણસ્ય પરિણામાત્મિકા વૃત્તિઃ કથમ્? ઇત્થમ્ ।
ન તાવદન્તઃકરણમ્ નિરવયવમ્, સાદિદ્રવ્યત્વેન સાવયવત્વાત્ ।
સાદિત્વઞ્ચ "તન્મનોઽસૃજત" ઇત્યાદિશ્રુતેઃ । વૃત્તિરૂપજ્ઞાનસ્ય
મનોધર્મત્વે ચ "કામઃ સઙ્કલ્પો વિચિકિત્સા શ્રદ્ધાઽશ્રદ્ધા
ધૃતિરધૃતિર્હ્રીર્ધીર્ભીરિત્યેતત્
સર્વં મન એવ" ઇતિ શ્રુતિર્માનમ્ , 'ધી' -શબ્દેન
વૃત્તિરૂપજ્ઞાનાભિધાનાત્ । અત એવ કામાદેરપિ
મનોધર્મત્વમ્ ॥

નનુ કામાદેરન્તઃકરણધર્મત્વે, "અહમિચ્છામિ, અહં
જાનામિ, અહં બિભેમિ"ઇત્યાદ્યનુભવ આત્મધર્મત્વમવગાહમાનઃ
કથમુપપદ્યતે ? ઉચ્યતે । અયઃપિણ્ડસ્ય દગ્ધૃત્વાભાવેઽપિ
દગ્ધૃત્વાશ્રયવહ્નિતાદાત્મ્યાધ્યાસાદ્
યથા "અયો દહતિ" ઇતિ વ્યવહારઃ તથા
સુખાદ્યાકારપરિણામ્યન્તઃ- કરણૈક્યાધ્યાસાત્
"અહં સુખી, અહં દુઃખી" ઇત્યાદિ વ્યવહારઃ ।

નનુ અન્તઃકરણસ્યેન્દ્રિયતયાઽતીન્દ્રિયત્વાત્ કથં
પ્રત્યક્ષવિષયતેતિ । ઉચ્યતે । ન તાવદન્તઃકરણમિન્દ્રિયમિત્યત્ર
માનમસ્તિ । "મનઃષષ્ઠાનીન્દ્રિયાણિ" ઇતિ ભગવદ્ગીતાવચનં પ્રમાણમિતિ
ચેત્ ન અનિન્દ્રિયેણાપિ મનસા ષટ્ત્વસંખ્યાપૂરણાવિરોધાત્ ।
નહીન્દ્રિયગતસંખ્યાપૂરણમિન્દ્રિયેનૈવેતિ નિયમઃ
"યજમાનપઞ્ચમા ઇડાં ભક્ષયન્તિ" ઇત્યત્ર
ઋત્વિગ્ગતપઞ્ચત્વસંખ્યાયા અનૃત્વિજાઽપિ

યજમાનેન "વેદાનધ્યાપયામાસ મહાભારતપઞ્ચમાન્"
ઇત્યાદૌ ચ વેદગતપઞ્ચત્વસંખ્યાયા અવેદેનાપિ ભારતેન
પૂરણદર્શનાત્ "ઇન્દ્રિયેભ્યઃ પરા હ્યર્થા અર્થેભ્યશ્ચ
પરં મનઃ" ઇત્યાદિશ્રુત્યા મનસોઽનિન્દ્રિયત્વાવગમાચ્ચ ।
ન ચૈવં મનસોઽનિન્દ્રિયત્વે સુખાદિપ્રત્યક્ષસ્ય
સાક્ષાત્ત્વં ન સ્યાત્ ઇન્દ્રિયાજન્યત્વાદિતિ વાચ્યમ્ ।
નહીન્દ્રિયજન્યત્વેન જ્ઞાનસ્ય સાક્ષાત્ત્વમ્
અનુમિત્યાદેરપિમનોજન્યતયા સાક્ષાત્ત્વાપત્તેઃ
ઈશ્વરજ્ઞાનસ્યાનિન્દ્રિયજન્યસ્ય સાક્ષાત્ત્વાનાપત્તેશ્ચ ।
સિદ્ધાન્તે પ્રત્યક્ષત્વપ્રયોજકં કિમિતિ ચેત્ કિં જ્ઞાનગતસ્ય
પ્રત્યક્ષત્વસ્ય પ્રયોજકં પૃચ્છસિ કિંવા વિષયગતસ્ય ।
આદ્યે પ્રમાણચૈતન્યસ્ય વિષયાવચ્છિન્નચૈતન્યાભેદ ઇતિ બ્રૂમઃ ।

તથાહિ ત્રિવિધં ચૈતન્યમ્ -
વિષયચૈતન્યં પ્રમાણચૈતન્યં પ્રમાતૃચૈતન્યં
ચેતિ । તત્ર ઘટાદ્યવચ્છિન્નં ચૈતન્યં વિષયચૈતન્યમ્
અન્તઃકરણવૃત્ત્યવચ્છિન્નં ચૈતન્યં પ્રમાણચૈતન્યમ્
અન્તઃકરણવચ્છિન્નં ચૈતન્યં પ્રમાતૃચૈતન્યમ્ ।

તત્ર યથા તડાગોદકં છિદ્રાન્નિર્ગત્ય કુલ્યાત્મના
કેદારાન્ પ્રવિશ્ય તદ્વદેવ ચતુષ્કોણાદ્યાકારં ભવતિ તથા
તૈજસમન્તઃકરણમપિ ચક્ષુરાદિદ્વારા નિર્ગત્ય
ઘટાદિવિષયદેશં ગત્વા ઘટાદિવિષયાકારેણ પરિણમતે । સ
એવ પરિણામો વૃત્તિરિત્યુચ્યતે । અનુમિત્યાદિસ્થલે તુ અન્તઃકરણસ્ય
ન વહ્ન્યાદિદેશગમનમ્ વહ્ન્યાદેશ્ચક્ષુરાદ્યસન્નિકર્ષાત્ ।
તથા ચ "અયં ઘટઃ"
ઇત્યાદિપ્રત્યક્ષસ્થલે ઘટાદેસ્તદાકારવૃત્તેશ્ચ
બહિરેકત્ર દેશે સમવધાનાત્ તદુભયાવચ્છિન્નં ચૈતન્યમેકમેવ
વિભાજકયોરપ્યન્તઃકરણવૃત્તિઘટાદિવિષયયોઃ એકદેશસ્થત્વેન
ભેદાજનકત્વાત્ । અત એવ મઠાન્તર્વર્તિઘટાવચ્છિન્નાકાશો
ન મઠાવચ્છિન્નાકાશાદ્ભિદ્યતે । તથા ચ "અયં ઘટઃ
" ઇતિ ઘટપ્રત્યક્ષસ્થલે ઘટાકારવૃત્તેર્ઘટસંયોગિતયા
ઘટાવચ્છિન્નચૈતન્યસ્ય તદ્વૃત્ત્યવચ્છિન્નચૈતન્યસ્ય

ચાભિન્નતયા તત્ર ઘટજ્ઞાનસ્ય ઘટાંશે પ્રત્યક્ષત્વમ્ । સુખાદ્યવચ્છિન્નચૈતન્યસ્ય તદ્વૃત્ત્યવચ્છિન્નચૈતન્યસ્ય ચ નિયમેનૈકદેશસ્થિતોપાધિદ્વયાવચ્છિન્નત્વાત્ નિયમેન "અહં સુખી" ઇત્યાદિજ્ઞાનસ્ય પ્રત્યક્ષત્વમ્ ।

નન્વેવં સ્વવૃત્તિસુખાદિસ્મરણસ્યાપિ સુખાદ્યંશે પ્રત્યક્ષત્વાપત્તિરિતિ ચેત્ ન તત્ર સ્મર્યમાણસુખસ્યાતીતત્વેન સ્મૃતિરૂપાન્તઃકરણવૃત્તેર્વર્તમાનત્વેન તત્રોપાધ્યોર્ભિન્નકાલીનતયા તત્તદવચ્છિન્નચૈતન્યયોર્ભેદાત્ । ઉપાધ્યોરેકદેશસ્થત્વે સતિ એકકાલીનત્વસ્યૈવોપાધેયાભેદપ્રયોજકત્વાત્ । યદિ ચૈકદેશસ્થત્વમાત્રમુપધેયાભેદપ્રયોજકમ્ તદા "અહં પૂર્વં સુખી" ઇત્યાદિસ્મૃતાવતિવ્યાપ્તિવારણાય વર્તમાતત્વં વિષય-વિશેષણં દેયમ્ ।

નન્વેવમપિ સ્વકીયધર્માધર્મૌ વર્તમાનૌ યદા શબ્દાદિના જ્ઞાયતે તદા તાદૃશશાબ્દજ્ઞાનાદાવતિવ્યાપ્તિઃ તત્ર ધર્માદ્યવચ્છિન્ન-તદ્વૃત્ત્યવચ્છિન્નચૈતન્યયોરેકત્વાદિતિ ચેત્ ન । યોગ્યત્વસ્યાપિ વિષયવિશેષણત્વાત્ । અન્તઃકરણધર્મત્વાવિશેષેઽપિ કિઞ્ચિદયોગ્યમિત્યત્ર ફલવલકલ્પ્યઃ સ્વભાવ એવ શરણમ્ । અન્યથા ન્યાયમતેઽપ્યાત્મધર્મત્વાવિશેષાત્ સુખાદિવત્ ધર્માદેરપિ પ્રત્યક્ષત્વાપત્તિર્દુર્વારા ।

ન ચૈવમપિ સુખસ્ય વર્તમાનતાદશાયાં "ત્વં સુખી" ઇત્યાદિવાક્યજન્યજ્ઞાનસ્ય પ્રત્યક્ષતા સ્યાદિતિ વાચ્યમ્ ઇષ્ટત્વાત્ । "દશમસ્ત્વમસિ" ઇત્યાદૌ સન્નિકૃષ્ટવિષયે શબ્દાદપ્યપરોક્ષજ્ઞાનાભ્યુપગમાત્ ।

અત એવ "પર્વતો વહ્નિમાન્" ઇત્યાદિજ્ઞાનમપિ બહ્ન્યંશે પરોક્ષમ્ પર્વતાંશેઽપરોક્ષમ્ પર્વતાદ્યવચ્છિન્નચૈતન્યસ્ય બહિર્નિઃસૃતાન્તઃકરણવૃત્ત્યવચ્છિન્નચૈતન્યાભેદાત્ । વહ્ન્યંશે તુ અન્તઃકરણવૃત્તિનિર્ગમનાભાવેન વહ્ન્યવચ્છિન્ન-ચૈતન્યસ્ય પ્રમાણચૈતન્યસ્ય ચ પરસ્પરં ભેદાત્ । તથાચાનુભવઃ "પર્વતં પશ્યામિ" "વહ્નિમનુમિનોમિ" ઇતિ । ન્યાયમતે તુ "પર્વતમનુમિનોમિ" ઇત્યનુવ્યવસાયાપત્તિઃ ।

અસન્નિકૃષ્ટપક્ષકાનુમિતૌ તુ સર્વાંશેઽપિ જ્ઞાનં
પરોક્ષમ્ । "સુરભિ ચન્દનમ્" ઇત્યાદિજ્ઞાનમપિ
ચન્દનખણ્ડાંશેઽપરોક્ષમ્
સૌરભાંશે ચ પરોક્ષમ્ સૌરભસ્ય
ચક્ષુરિન્દ્રિયાયોગ્યતયા યોગ્યત્વઘટિતસ્ય નિરુક્તલક્ષણસ્યાભાવાત્ ।

ન ચૈવમેકત્ર જ્ઞાને પરોક્ષત્વાપરોક્ષત્વયોરભ્યુપગમે
તયોર્જાતિત્વં ન સ્યાદિતિ વાચ્યમ્ ઇષ્ટત્વાત્ ।
જાતિત્વોપાધિત્વપરિભાષાયાઃ
સકલપ્રમાણાગોચરતયાઽપ્રામાણિકત્વાત્ ।
"ઘટોઽયમ્" ઇત્યાદિપ્રત્યક્ષં હિ ઘટત્વાદિસદ્ભાવે
માનમ્ ન તુ તસ્ય જાતિત્વેપિ જાતિત્વરૂપસાધ્યપ્રસિદ્ધૌ
તત્સાધકાનુમાનસ્યાપ્યનવકાશાત્ । સમવાયાસિદ્ધ્યા
બ્રહ્મભિન્નનિખિલપ્રપઞ્ચસ્યાનિત્યતયા ચ નિત્યત્વસમવેતત્વઘટિતજાતિત્વસ્ય
ઘટત્વાદાવસિદ્ધેશ્ચ । એવમેવોપાધિત્વં નિરસનીયમ્ ।

"પર્વતો વહ્નિમાન્" ઇત્યાદૌ ચ પર્વતાંશે વહ્ન્યંશે
ચાન્તઃકરણવૃત્તિભેદાઙ્ગીકારેણ તત્તદ્વૃત્ત્યવચ્છેદકભેદેન
પરોક્ષત્વાપરોક્ષત્વયોરેકત્ર ચૈતન્યે વૃત્તૌ ન કશ્ચિત્ વિરોધઃ । તથા
ચ તત્તદિન્દ્રિયયોગ્યવર્તમાનવિષયાવચ્છિન્નચૈતન્યભિન્નત્વં
તત્તદાકારવૃત્ત્યવચ્છિન્નજ્ઞાનસ્ય તત્તદંશે પ્રત્યક્ષત્વમ્ ।

ઘટાદેર્વિષયસ્ય પ્રત્યક્ષત્વન્તુ પ્રમાત્રભિન્નત્વમ્ ।
નનુ કથં ઘટાદેરન્તઃકરણાવચ્છિન્નચૈતન્યભેદઃ "અહમિદં
પશ્યામિ" ઇતિ ભેદાનુભવવિરોધાદિતિ ચેત્ ઉચ્યતે । પ્રમાત્રભેદો
નામ ન તાવદૈક્યમ્ કિન્તુ પ્રમાતૃસત્તાતિરિક્તસત્તાકત્વાભાવઃ । તથા
ચ ઘટાદેઃ સ્વાવચ્છિન્નચૈતન્યેઽધ્યસ્તતયા વિષયચૈતન્યસત્તૈવ
ઘટાદિસત્તા અધિષ્ઠાનસત્તાતિરિક્તયા
આરોપિતસત્તાયાનઙ્ગીકારાત્ । વિષયચૈતન્યં ચ
પૂર્વોક્તપ્રકારેણ પ્રમાતૃચૈતન્યમેવેતિ પ્રમાતૃચૈતન્યૈસ્યૈવ
ઘટાદ્યધિષ્ઠાનતયા પ્રમાતૃસત્તૈવ ઘટાદિસત્તા નાન્યેતિ
સિદ્ધં ઘટાદેરપરોક્ષત્વમ્ અનુમિત્યાદિસ્થલે ત્વન્તઃકરણસ્ય
વહ્ન્યાદિદેશનિર્ગમનાભાવેન વહ્ન્યવચ્છિન્નચૈતન્યસ્ય
પ્રમાતૃચૈતન્યાત્મકતયા વહ્ન્યાદિસત્તા પ્રમાતૃસત્તાતો ભિન્ના ઇતિ નાતિવ્યાપ્તિઃ ।

નન્વેવમપિ ધર્માધર્માદિગોચરાનુમિત્યાદિસ્થલે
ધર્માધર્મયોઃ પ્રત્યક્ષત્વાપત્તિઃ
ધર્માદ્યવચ્છિન્નચૈતન્યસ્ય પ્રમાતૃચૈતન્યાભિન્નતયા
ધર્માદિસત્તાયાઃ પ્રમાતૃસત્તાનતિરેકાદિતિ ચેત્
ન યોગ્યત્વસ્યાપિ વિશેષવિશેષણત્વાત્ ।

નન્વેવમપિ "રૂપી ઘટઃ" ઇતિ પ્રત્યક્ષસ્થલે
ઘટગતપરિમાણાદેઃ પ્રત્યક્ષત્વાપત્તિઃ
રૂપાવચ્છિન્નચૈતન્યસ્ય પરિમાણાદ્યવચ્છિન્નચૈતન્યસ્ય
ચૈકતયા રૂપાવચ્છિન્નચૈતન્યસ્ય પ્રમાતૃચૈતન્યાભેદે
પરિમાણાદ્યવચ્છિન્નચૈતન્યસ્યાપિ પ્રમાત્રભિન્નતયા
પરિમાણાદિમત્તાયાઃ પ્રમાતૃસત્તાતિરિક્તત્વાભાવાત્
ઇતિ ચેત્ ન તત્તદાકારવૃત્ત્યુપહિતત્વસ્યાપિ
પ્રમાતૃવિશેષણત્વાત્ ।
રૂપાકારવૃત્તિદશાયાં પરિમાણાદ્યાકારવૃત્ત્યભાવેન અતિવ્યાપ્ત્યભાવાત્ ।

નન્વેવં વૃત્તાવવ્યાપ્તિઃ અનવસ્થાભિયા વૃત્તિગોચરવૃત્ત્યનઙ્ગીકારેણ
તત્ર સ્વાકારવૃત્ત્યુપહિતત્વઘટિતોક્તલક્ષણાભાવાત્ ઇતિ ચેત્ ન ।
અનવસ્થાભિયા વૃત્તેર્વૃત્ત્યન્તરાવિષયત્વેઽપિ સ્વવિષયત્વાભ્યુપગમેન
સ્વવિષયવૃત્ત્યુપહિતપ્રમાતૃચૈતન્યાભિન્નસત્તાકત્વસ્ય તત્રાપિ ભાવાત્ ।

એવાઞ્ચાન્તઃકરણતદ્ધર્માદીનાં કેવલસાક્ષિવિષયત્વેઽપિ
તત્તદાકારવૃત્ત્યભ્યુપગમેન ઉક્તલક્ષણસ્ય તત્રાપિ સત્તાન્નાવ્યાપ્તિઃ ।
ન ચાન્તઃકરણતદ્ધર્માદીનં
વૃત્તિવિષયત્વાભ્યુપગમે કેવલસાક્ષિવિષયત્વાભ્યુપગમવિરોધ
ઇતિ વાચ્યમ્ । ન હિ વૃત્તિં વિના સાક્ષિવિષયત્વં
કેવલસાક્ષિવેદ્યત્વમ્ કિન્ત્વિન્દ્રિયાનુમાનાદિપ્રમાણવ્યાપારમન્તરેણ
સાક્ષિવિષયત્વમ્ અત
એવાહઙ્કારટીકાયામાચાર્યૈરહમાકારાન્તઃ-
કરણવૃત્તિરઙ્ગીકૃતા । અત એવ ચ પ્રાતિભાસિકરજતસ્થલે
રજતાકારાવિદ્યાવૃત્તિઃ સામ્પ્રદાયિકૈરઙ્ગીકૃતા । તથાચાન્તઃકરણતદ્ધર્માદિષુ
કેવલસાક્ષિવેદ્યેષુ વૃત્ત્યુપહિતત્વઘટિતલક્ષણસ્ય
સત્ત્વાન્નાવ્યાપ્તિઃ । તદયં નિર્ગલિતાર્થઃ -
"સ્વાકારવૃત્ત્યુપહિત-
પ્રમાતૃચૈતન્યસત્તાતિરિક્તસત્તાકત્વશૂન્યત્વે સતિ યોગ્યત્વં વિષયસ્ય

પ્રત્યક્ષત્વમ્" ।

તત્ર સંયોગ- સંયુક્તતાદાત્મ્યાદીનાં સન્નિકર્ષાણાં
ચૈતન્યાભિવ્યઞ્જકવૃત્તિજનને વિનિયોગઃ ।
સા ચ વૃત્તિશ્ચતુર્વિધા - સંશયો નિશ્ચયો ગર્વઃ સ્મરણમિતિ ।
એવંવિધવૃત્તિભેદેન એવમપ્યન્તઃકરણં મન
ઇતિ બુદ્ધિરિતિ અહઙ્કાર ઇતિ ચિત્તમિતિ ચાખ્યાયતે । તદુક્તમ્ -
"મનોબુદ્ધિરહઙ્કારશ્ચિત્તં કરણમન્તરમ્ ।
સંશયો નિશ્ચયો ગર્વઃ સ્મરણં વિષયા ઇમે ॥"

તચ્ચ પ્રત્યક્ષં દ્વિવિધમ્ સવિકલ્પકનિર્વિકલ્પકભેદાત્ । તત્ર સવિકલ્પકં
વૈશિષ્ટ્યાવગાહિ જ્ઞાનમ્ । યથા
"ઘટમહં જાનામિ" ઇત્યાદિજ્ઞાનમ્ ।
નિર્વિકલ્પકન્તુ સંસર્ગાનવગાહિ જ્ઞાનમ્ । યથા
"સોઽયં દેવદત્તઃ" "તત્ત્વમસિ" ઇત્યાદિવાક્યજન્યં જ્ઞાનમ્ ।

નનુ શાબ્દમિદં જ્ઞાનમ્ ન પ્રત્યક્ષમ્
ઇન્દ્રિયાજન્યત્વાત્
ઇતિ ચેત્ ન । નહિ ઇન્દ્રિયજન્યત્વં
પ્રત્યક્ષત્વે તન્ત્રમ્ દૂષિતત્વાત્ કિન્તુ યોગ્યવર્તમાનવિષયકત્વે
સતિ પ્રમાણચૈતન્યસ્ય વિષયચૈતન્યાભિન્નત્વમિત્યુક્તમ્ ।
તથાચ "સોઽયં દેવદત્તઃ" ઇતિ વાક્યજન્યજ્ઞાનસ્ય
સન્નિકૃષ્ટવિષયતયા બહિર્નિઃસૃતાન્તઃકરણવૃત્ત્ય- ભ્યુપગમેન
દેવદત્તવચ્છિન્નચૈતન્યસ્ય વૃત્ત્યવચ્છિન્નચૈતન્યાભિન્નતયા
"સોઽયં દેવદત્તઃ" ઇતિ વાક્યજન્યજ્ઞાનસ્ય પ્રત્યક્ષત્વમ્ ।
એવં "તત્ત્વમસિ" ઇત્યાદિવાક્યજન્યજ્ઞાનસ્યાપિ
તત્ર પ્રમાતુરેવ વિષયતયા તદુભયાભેદસ્ય સત્ત્વાત્ ।

નનુ વાક્યજન્યજ્ઞાનસ્ય પદાર્થસંસર્ગાવગાહિતયા
કથં નિર્વિકલ્પકત્વમ્ ? ઉચ્યતે । વાક્યજન્યજ્ઞાનવિષયત્વે
હિ ન પદાર્થસંસર્ગત્વં તન્ત્રમ્ અનભિમતસંસર્ગસ્યાપિ
વાક્યજન્યજ્ઞાનવિષયત્વાપત્તેઃ કિન્તુ તાત્પર્યવિષયત્વમ્ ।
પ્રકૃતે ચ "સદેવ સોમ્યેદમગ્ર આસીત્" ઇત્યુપક્રમ્ય
"તત્ સત્યમ્ સ આત્મા તત્ત્વમસિ શ્વેતકેતો"
ઇત્યુપસંહારેણ વિશુદ્ધેબ્રહ્મણિ વેદાન્તાનાં તાત્પર્યમવસિતમ્

ઇતિ કથં તાત્પર્યાવિષયં સંસર્ગમવબોધયેત્ । ઇદમેવ "તત્ત્વમસિ" ઇત્યાદિવાક્યાનામખણ્ડાર્થત્વં યત્ સંસર્ગાનવગાહિયથાર્થજ્ઞાનજનકત્વમિતિ । તદુક્તમ્ ।

"સંસર્ગાસઙ્ગિસમ્યગ્ધીહેતુતા યા ગિરામિયમ્ ।
ઉક્તાખણ્ડાર્થતા યદ્વા તત્પ્રાતિપદિકાર્થતા ॥"

પ્રાતિપદિકાર્થમાત્રપરત્વં વાઽખણ્ડાર્થત્વમ્ ઇતિ ચતુર્થપાદાર્થઃ ।

તચ્ચ પ્રત્યક્ષં પુનર્દ્વિવિધમ્ - જીવસાક્ષિ ઈશ્વરસાક્ષિ ચેતિ । તત્ર જીવો નામ અન્તઃકરણાવચ્છિન્નં ચૈતન્યમ્ તત્સાક્ષી તુ અન્તઃકરણોપહિતં ચૈતન્યમ્ । અન્તઃકરણસ્ય વિશેષણત્વોપાધિત્વાભ્યામનયોર્ભેદઃ । વિશેષણઞ્ચ કાર્યાન્વયિ વર્તમાનં વ્યાવર્તકમ્ ઉપાધિશ્ચ કાર્યાનન્વયી વ્યાવર્તકો વર્તમાનશ્ચ । "રૂપવિશિષ્ટોઘટોઽનિત્યઃ"ઇત્યત્ર રૂપં વિશેષણમ્ "કર્ણશષ્કુલ્યવચ્છિન્નં નભઃ શ્રોત્રમ્" ઇત્યત્ર કર્ણશષ્કુલ્યુપાધિઃ । અયમેવોપાધિર્નૈયાયિકૈઃ પરિચાયક ઇત્યુચ્યતે । પ્રકૃતે ચાન્તઃકરણસ્ય જડતયા વિષયભાસકત્વાયોગેન વિષયભાસકચૈતન્યોપાધિત્વમ્ । અયઞ્ચ જીવસાક્ષી પ્રત્યાત્મં નાના એકત્વે ચૈત્રાવગતે મૈત્રસ્યાપ્યનુસન્ધાનપ્રસઙ્ગઃ । ઈશ્વરસાક્ષી તુ માયોપહિતં ચૈતન્યમ્ । તચ્ચૈકમ્ તદુપાધિભૂતમાયાયા એકત્વાત્ । "ઇન્દ્રો માયાભિઃ પુરુરૂપ ઈયતે" ઇત્યાદિશ્રુતૌ માયાભિરિતિ બહુવચનસ્ય માયાગત-શક્તિવિશેષાભિપ્રાયતયા માયાગતસત્ત્વરજસ્તમોરૂપગુણાભિ-પ્રાયતયા વોપપત્તિઃ ।

"માયાન્તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ।"

"તરત્યવિદ્યાં વિતતાં હૃદિ યસ્મિન્નિવેશિતે ।
યોગી માયામમેયામ તસ્મૈ વિદ્યાત્મને નમઃ ॥"

"અજામેકાં લોહિતશુક્લકૃષ્ણાં
વહ્વીઃ પ્રજા સૃજમાનાં સરૂપાઃ ।
અજો હ્યેકો જુષમાનોઽનુશેતે
જહાત્યેનાં ભુક્તભોગામજોઽન્યઃ ॥"

ઇત્યાદિ શ્રુતિસ્મૃતિષુ એકવચનેન લાઘવાનુગૃહીતેન માયાયા

એકત્વં નિશ્ચીયતે ।

તતશ્ચ તદુપહિતં ચૈતન્યમ્ ઈશ્વરસાક્ષી । તચ્ચાનાદિ તદુપાધેર્માયાયા અનાદિત્વાત્ । માયાવચ્છિન્નં ચૈતન્યં ચ પરમેશ્વરઃ । માયાયા વિશેષણત્વે ઈશ્વરત્વં ઉપાધિત્વે સાક્ષિત્વં ઇતીશ્વરત્વસાક્ષિત્વયોર્ભેદઃ ન તુ ધર્મિણોરીશ્વરતત્સાક્ષિણોઃ ।

સ ચ પરમેશ્વર એકોऽપિ સ્વોપાધિભૂતમાયાનિષ્ઠસત્ત્વરજસ્તમોગુણભેદેન બ્રહ્માવિષ્ણુમહેશ્વરાદિશબ્દવાચ્યતાં ભજતે ।

નનુ ઈશ્વરસાક્ષિણોऽનાદિત્વે "તદૈક્ષત બહુસ્યાં પ્રજાયેય" ઇત્યાદૌ સૃષ્ટિપૂર્વસમયે પરમેશ્વરસ્યાગન્તુકમીક્ષણમુચ્યમાનં કથમુપપદ્યતે ઉચ્યતે । યથા વિષયેન્દ્રિયસન્નિકર્ષાદિકારણવશેન જીવોપાધ્યન્તઃકરણસ્ય વૃત્તિભેદા જાયન્તે તથા સૃજ્યમાન-પ્રાણિકર્મવશેન પરમેશ્વરોપાધિભૂતમાયાયા વૃત્તિવિશેષાઃ "ઇદમિદાનીં સ્રષ્ટવ્યમ્" "ઇદમિદાનીં પાલયિતવ્યમ્" "ઇદમિદાનીં સંહર્તવ્યમ્" ઇત્યાદ્યાકારા જાયન્તે । તાસાં ચ વૃત્તીનાં સાદિત્વાત્તત્પ્રતિબિમ્બિતચૈતન્યમપિ સાદીત્યુચ્યતે । એવં સાક્ષિદ્વૈવિધ્યેન પ્રત્યક્ષજ્ઞાનદ્વૈવિધ્યમ્ । પ્રત્યક્ષત્વં ચ જ્ઞેયગતં ઝપ્તિગતં ચ નિરૂપિતમ્ । તત્ર જ્ઞપ્તિગતપ્રત્યક્ષત્વસ્ય સામાન્યલક્ષણં ચિત્ત્વમેવ "પર્વતો વહ્નિમાન્" ઇત્યાદાવપિ વહ્ન્યદ્યાકારવૃત્ત્યુપહિતચૈતન્યસ્ય સ્વાત્માંશે સ્વપ્રકાશતયા પ્રત્યક્ષત્વાત્ । તત્તદ્વિષયાશપ્રત્યક્ષત્વન્તુ પૂર્વોક્તમેવ । તસ્ય ચ ભ્રાન્તિરૂપપ્રત્યક્ષે નાતિવ્યાપિત્ઃ ભ્રમપ્રમાસાધારણપ્રત્યક્ષત્વ-સામાન્યનિર્વચનેન તસ્યાપિ લક્ષ્યત્વાત્ । યદા તુ પ્રત્યક્ષપ્રમાયા એવ લક્ષણં વક્તવ્યં તદા પૂર્વોક્તલક્ષણેऽબાધિતત્વં વિષયવિશેષણં દેયમ્ । શુક્તિરૂપ્યાદિભ્રમસ્ય સંસારકાલીનબાધવિષયપ્રાતિભાસિક-રજતાદિવિષયકત્વેનોક્તલક્ષણાભાવાત્ નાતિવ્યાપ્તિઃ ।

નનુ વિસંવાદિપ્રવૃત્ત્યા ભ્રાન્તિજ્ઞાતસિદ્ધાવપિ તસ્ય પ્રાતિભાસિકતત્કાલોત્પન્નરજતાદિવિષયકત્વે ન પ્રમાણમ્ દેશાન્તરીયરજતસ્ય ક્લૃપ્તસ્યૈવ તદ્વિષયત્વસમ્ભવાદિતિ ચેત્ ન તસ્યાસન્નિકૃષ્ટતયા પ્રત્યક્ષવિષયત્વાયોગાત્ । ન ચ જ્ઞાનં તત્ર પ્રત્યાસત્તિઃ જ્ઞાનસ્ય પ્રત્યાસત્તિત્વે તત એવ વહ્ન્યાદેઃ પ્રત્યક્ષત્વાપત્તૌ અનુમાનાદ્યુચ્છેદાપત્તેઃ ।

નનુ રજતોત્પાદકાનાં રજતાવયવાદીનામભાવે શુક્તૌ
કથં તવાપિ રજતમુત્પદ્યતે ઇતિ ચેત્ ઉચ્યતે । ન હિ
લોકસિદ્ધસામગ્રી પ્રાતિભાસિકરજતોત્પાદિકા કિન્તુ
વિલક્ષણૈવ । તથા હિ કાચાદિદિષદૂષિતલોચનસ્ય પુરોવર્તિ-
દ્રવ્યસંયોગાદિદમાકારા ચાકચિક્યાકારા ચ કાચિદન્તઃકરણ-
વૃત્તિરુદેતિ । તસ્યાં ચ વૃત્તૌ ઇદમવચ્છિન્નચૈતન્યં પ્રતિબિમ્બતે ।
તત્ર પૂર્વોક્યરીત્યા વૃત્તેર્નિર્ગમનેન ઇદમવચ્છિન્નચૈતન્યવૃત્તવચ્છિન્ન-
ચૈતન્યં પ્રમાતૃચૈતન્યં ચાભિન્નં ભવતિ । તતશ્ચ પ્રમાતૃચૈતન્યા-
ભિન્નવિષયચૈતન્યનિષ્ઠા શુક્તિત્વ પ્રકારિકાઽવિદ્યા ચાકચિક્યાદિ-
સાદૃશ્યસન્દર્શનસમુદ્બોધિતરજતસંસ્કારસધ્રીચીના કાચાદિદોષ-
સમવહિતા રજતરૂપાર્થાકારેણ રજતજ્ઞાનાભાસાકારેણ ચ પરિણમતે ।

પરિણામો નામ ઉપાદાનસમસત્તાકકાર્યાપત્તિઃ ।
વિવર્તો નામ ઉપાદાનવિષમસત્તાકકાર્યાપત્તિઃ ।
પ્રાતિભાસિકરજતઞ્ચાવિદ્યાપેક્ષયા પરિણામ ઇતિ
ચૈતન્યાપેક્ષયાવિવર્ત ઇતિ ચોચ્યતે ।
અવિદ્યાપરિણામરૂપઞ્ચ તદ્રજતમવિદ્યાધિષ્ઠાને
ઇદમવચ્છિન્નચૈતન્યે વર્તતે અસ્મન્મતે સર્વસ્યાપિ
કાર્યસ્ય સ્વોપાદાનાવિદ્યાધિષ્ઠાનાશ્રિતત્વનિયમાત્ ।

નનુ ચૈતન્યનિષ્ઠરજતસ્ય કથમિદં રજતમિતિપુરવર્તિના
તાદાત્મ્યમ્ । ઉચ્યતે - યથા ન્યાયમતે આત્મનિષ્ઠસ્ય
સુખાદેઃ શરીરનિષ્ઠત્વેનોપલમ્ભઃ શરીરસ્ય
સુખાદ્યધિકરણતાવચ્છેદકત્વાત્ તથા ચૈતન્યમાત્રસ્ય
રજતં પ્રત્યનધિષ્ઠાનતયા ઇદમવચ્છિન્નચૈતન્યસ્ય
તદધિષ્ઠાનત્વેન ઇદમોઽવચ્છેદકતયા રજતસ્ય
પુરોવર્તિસંસર્ગપ્રત્યય ઉપપદ્યતે । તસ્ય ચ
વિષયચૈતન્યસ્ય તદન્તઃકરણોપહિત ચૈતન્યાભિન્નતયા
વિષયચૈતન્યેઽધ્યસ્તમપિ રજતં સાક્ષિણ્યધ્યસ્તં
કેવલસાક્ષિવેદ્યં સુખાદિવદનન્યવેદ્યમિતિ ચોચ્યતે ।

નનુ સાક્ષિણ્યધ્યસ્તત્વે " અહં રજતમ્ " ઇતિ " તદ્વાન્ "
ઇતિ વા પ્રત્યયઃ સ્યાત્ " અહં સુખી " ઇતિવત્ ઇતિ ચેત્
ઉચ્યતે । ન હિ સુખાદીનામન્તઃકરણાવચ્છિન્નચૈતન્યનિષ્ઠા-

વિદ્યાકાર્યત્વપ્રયુક્તમ્ " અહં સુખી " ઇતિ જ્ઞાનમ્ સુખાદીનાં
ઘટાદિવચ્છુદ્ધચૈતન્ય એવાધ્યાસાત્ । કિન્તુ યસ્ય યદાકારા-
નુભવાહિતસંસ્કારસહકૃતાવિદ્યાકાર્યત્વં તસ્ય તદાકારા-
નુભવવિષયત્વમ્ ઇત્યેવાનુગતં નિયામકમ્ । તથા ચ
ઇદમાકારાનુભવાહિતસંસ્કારસહિતાવિદ્યાકાર્યત્વાદ્ ઘટાદે-
રિદમાકારાનુભવવિષયત્વમ્ અહમાકારાનુભવાહિતસંકાર-
સહકૃતાવિદ્યાકાર્યત્વાદન્તઃકરણાદેરહમાકારાનુભવવિષયત્વમ્
શરીરેન્દ્રિયાદેરુભયવિધાનુભવસંસ્કારસહિતાવિદ્યાકાર્યત્વા-
દુભયવિધાનુભવવિષયત્વમ્ । તથાચોભયવિધાનુભવઃ - ઇદં
શરીરમ્ અહં દેહઃ અહં મનુષ્યઃ અહં બ્રાહ્મણઃ ઇદં ચક્ષુઃ
અહં કાણઃ ઇદં શ્રોત્રમ્ અહં બધિર ઇતિ । પ્રકૃતે
પ્રાતિભાસિકરજતસ્ય પ્રમાતૃચૈતન્યાભિન્નેદમવચ્છિન્નચૈતન્ય-
નિષ્ઠાવિદ્યાકાર્યત્વેઽપિ ઇદં રજતમિતિ સત્યસ્થલીયેદમાકારા-
નુભવાહિતસંસ્કારજન્યત્વાદ્દિદમાકારાનુભવવિષયતા ન તુ
" અહં રજતમ્ " ઇત્યહમાકારાનુભવવિષયતા ઇત્યનુસન્ધેયમ્ ।

નન્વેવમપિ મિથ્યારજતસ્ય સાક્ષાત્ સાક્ષિસમ્બન્ધિતયા ભાનસમ્ભવે
રજતગોચરજ્ઞાનાભાસરૂપાયા અવિદ્યાવૃત્તેરભ્યુપગમઃ કિમર્થમિતિ ચેત્
ઉચ્યતે । સ્વગોચરવૃત્ત્યુપહિતપ્રમાતૃચૈતન્યભિન્નસત્તાકત્વાભાવસ્ય
વિષયાપરોક્ષત્વરૂપતયા રજતસ્યાપરોક્ષસિદ્ધયે તદભ્યુપગમાત્ ।
નન્વિદંવૃત્તે રજતાકારવૃત્તેશ્ચ પ્રત્યેકમેકૈકવિષયત્વે ગુરુમતવદ્વિશિષ્ટ-
જ્ઞાનાનપ્યુપગમે કુતો ભ્રમજ્ઞાનાસિદ્ધિરિતિ ચેત્ ન વૃત્તિદ્વય-
પ્રતિબિમ્બિતચૈતન્યસ્યૈકસ્ય સત્યમિથ્યાવસ્તુતાદાત્મ્યાવગાહિત્વેન
ભ્રમત્વસ્વીકારાત્ । અત એવ સાક્ષિજ્ઞાનસ્ય સત્યાસત્યવિષયતયા
પ્રામાણ્યાનિયમાદપ્રામાણ્યોક્તિઃ સામ્પ્રદાયિકાનામ્ ।

નનુ સિદ્ધાન્તે દેશાન્તરીયરજતમપ્યવિદ્યાકાર્યમધ્યસ્તઞ્ચેતિ
કથં શુક્તિરૂપ્યસ્ય તતો વૈલક્ષણ્યમ્ ઇતિ ચેત્ ન । ત્વન્મતે
સત્યત્વાવિશેષેઽપિ કેષાઞ્ચિત્ ક્ષણિકત્વં કેષાઞ્ચિત્ સ્થાયિત્વમ્
ઇત્યત્ર યદેવ નિયામકં તદેવ સ્વભાવવિશેષાદિકં મમાપિ । યદ્વા
ઘટાદ્યધ્યાસે અવિદ્યૈવ દોષત્વેન હેતુઃ શુક્તિરૂપાદ્યધ્યાસે તુ
કાચાદયોઽપિ દોષાઃ । તથાચાગન્તુકદોષજન્યત્વં પ્રાતિભાસિકત્વે
પ્રયોજકમ્ । અત એવ સ્વપ્નોપલબ્ધરથાદીનામાગન્તુકનિદ્રાદોષજન્યત્વાત્ ।

પ્રાતિભાસિકત્વમ્ ।

નનુ સ્વપ્નસ્થલે પૂર્વાનુભૂતરથાદેઃ સ્મરણમાત્રેણૈવ વ્યવહારોપપત્તૌ ન રથાદિસૃષ્ટિકલ્પનમ્ ગૌરવાત્ ઇતિ ચેત્ ન રથાદેઃ સ્મૃતિમાત્રાભ્યુપગમે "રથં પશ્યામિ" "સ્વપ્ને રથમદ્રાક્ષ્યમ્" ઇત્યાદ્યનુભવવિરોધાપત્તેઃ । "અથ રથાન્ રથયોગાન્ પથઃ સૃજતે" ઇતિ રથાદિસૃષ્ટિપ્રતિપાદકશ્રુતિવિરોધાપત્તેશ્ચ । તસ્માત્ શુક્તિરૂપ્યવત્ સ્વપ્નોપલબ્ધરથાદયોઽપિ પ્રાતિભાસિકા યાવત્પ્રતિભાસમવતિષ્ઠન્તે ।

નનુ સ્વપ્ને રથાદ્યધિષ્ઠાનતયોપલભ્યમાનદેશવિશેષસ્યાપિ તદાઽસન્નિકૃષ્ટતયા અનિર્વચનીયપ્રાતિભાસિકદેશોઽભ્યુપગન્ચવ્યઃ તથા ચ રથાદ્યધ્યાસઃ કુત્ર ઇતિ ચેત્ ન ચૈતન્યસ્ય સ્વયંપ્રકાશસ્ય રથાદ્યધિષ્ઠાનત્વાત્ । પ્રતીયમાનં રથાદ્યસ્તીત્યેવ પ્રતીયતે ઇતિ સદ્રૂપેન પ્રકાશમાનં ચૈતન્યમેવાધિષ્ઠાનમ્ । દેશવિશેષોઽપિ ચિદધ્યસ્તઃ પ્રાતિભાસિકઃ રથાદાવિન્દ્રિયગ્રાહ્યત્વમપિ પ્રાતિભાસિકમ્ તદા સર્વેન્દ્રિયાણામુપરમાત્ । "અહં રથઃ" ઇત્યાદિપ્રતીત્યાપાદનન્તુ પૂર્વવન્નિરસનીયમ્ । સ્વપ્નરથદયઃ સાક્ષાન્માયાપરિણામા ઇતિ કેચિત્ । અન્તઃકરણદ્વારા તત્પરિણામા ઇત્યન્યે ।

નનુ રથાદેઃ શુદ્ધચૈતન્યાધ્યસ્તત્વે ઇદાનીં તત્સાક્ષાત્કારાભાવેનજાગરણેઽપિ સ્વપ્નોપલબ્ધરથાદયોઽનુવર્તેરન્ । ઉચ્યતે । કાર્યવિનાશો હિ દ્વિવિધઃ કશ્ચિદુપાદાનેન સહ કશ્ચિત્તુ વિદ્યમાનએવોપાદાને । આદ્યો બાધઃ દ્વિતીયસ્તુ નિવૃત્તિઃ । આદ્યસ્ય કારણમધિષ્ઠાનતત્ત્વસાક્ષાત્કારઃ તેન વિનોપાદાનભૂતાયા અવિદ્યાયા અનિવૃત્તેઃ । દ્વિતીયસ્ય કારણં વિરોધિવૃત્ત્યુત્પત્તિર્દોષનિવૃત્તિર્વા । તદિહ બ્રહ્મસાક્ષાત્કારાભાવાત્ સ્વપ્નપ્રપઞ્ચો મા બાધિષ્ઠ મુસલપ્રહારેણ ઘટાદેરિવ વિરોધિપ્રત્યયાન્તરોદયેન સ્વજનકીભૂતનિદ્રાદિદોષનાશેન વા રથાદિનિવૃત્તૌ કો વિરોધઃ ।

એવં ચ શુક્તિરૂપ્યસ્ય શુક્ત્યવચ્છિન્નચૈતન્યનિષ્ઠતૂલાવિદ્યાકાર્યત્વપક્ષે શુક્તિરિતિજ્ઞાનેન તદજ્ઞાનેન સહ રજતસ્ય બાધઃ । મૂલાવિદ્યાકાર્યત્વપક્ષે તુ મૂલાવિદ્યાયા બ્રહ્મસાક્ષાત્કારમાત્રનિવર્ત્યતયા રજતસ્ય તત્ર શુક્તિજ્ઞાનાન્નિવૃત્તિમાત્રમ્ મુસલપ્રહારેણ ઘટસ્યેવ ।

નનુ શુક્તૌ રજતસ્ય પ્રતિભાસસમયે પ્રાતિભાસિકસત્તાભ્યુપગમે "નેદં રજતમ્" ઇતિ ત્રૈકાલિકનિષેધજ્ઞાનં ન સ્યાત્ કિન્તુ "ઇદાનીમિદં ન રજતમ્" ઇતિ સ્યાત્ "ઇદાનીં ઘટઃ શ્યામો ન" ઇતિવત્ ઇતિ ચેત્ ન નહિ તત્ર રજતત્વાવચ્છિન્નપ્રતિયોગિતાકાભાવો નિષેધધીવિષયઃ કિન્તુ લૌકિકપારમાર્થિકત્વાવચ્છિન્ન- પ્રાતિભાસિકરજતપ્રતિયોગિતાકઃ વ્યધિકરણધર્માવચ્છિન્નપ્રતૈયોગિતાકાભાવાભ્યુપગમાત્ ।

નનુ પ્રાતિભાસિકે રજતે પારમાર્થિકત્વમવગતં ન વા । અનવગમે પ્રતિયોગિતાવચ્છેદકાવચ્છિન્નરજતસ્ત્વજ્ઞાનાભાવાદભાવ- પ્રત્યક્ષાનુપપત્તિઃ । અવગમેઽપરોક્ષાવભાસસ્ય તત્કાલીનવિષય- સત્તાનિયતત્વાદ્ રજતે પારમાર્થિકત્વમપ્યનિર્વચનીયં રજતદેવોત્પન્નમિતિ તદવચ્છિન્નરજતસત્ત્વે તદવચ્છિન્નાભાવસ્તત્ર કથં વર્તત ઇતિ ચેત્ ન પારમાર્થિકત્વસ્યાધિષ્ઠાનનિષ્ઠસ્ય રજતે પ્રતિભાસસમ્ભવેન રજતનિષ્ઠપારમાર્થિકત્વોત્પત્ત્યનભ્યુપગમાત્ । યત્રારોપ્યમસન્નિકૃષ્ટં તત્રૈવ પ્રાતિભાસિકવસ્તૂત્પત્તેરઙ્ગીકારાત્ । અત એવ ઇન્દ્રિયસન્નિકૃષ્ટતયા જવાકુસુમગતલૌહિત્યસ્ય સ્ફટિકે ભાનસમ્ભવાત્ ન સ્ફટિકેઽનિર્વચનીયલૌહિત્યોત્પત્તિઃ । નન્વેવં યત્ર જપાકુસુમં દ્રવ્યાન્તરવ્યવધાનાદસન્નિકૃષ્ટં તત્ર લૌહિત્યપ્રતીત્યા પ્રાતિભાસિકં લૌહિત્યં સ્વીક્રિયતામિતિ ચેત્ ન ઇષ્ટત્વાત્ ।

એવં પ્રત્યક્ષભ્રમાન્તરેષ્વપિપ્રત્યક્ષસામાન્યલક્ષણાનુગમો યથાર્થપ્રત્યક્ષલક્ષણાસદ્ભાવશ્ચ દર્શનીયઃ ।
ઉક્તં પ્રત્યક્ષં પ્રકારાન્તરેણ દ્વિવિધમ્ - ઇન્દ્રિયજન્યં તદજન્યં ચેતિ ।
તત્રેન્દ્રિયાજન્યં સુખાદિત્રત્યક્ષમ્ મનસ ઇન્દ્રિયત્વનિરાકરણાત્ ।
ઇન્દ્રિયાણિ પઞ્ચ ઘ્રાણરસનચક્ષુઃશ્રોત્રત્વગાત્મકાનિ । સર્વાણિ ચેન્દ્રિયાણિ સ્વસ્વવિષયસંયુક્તાન્યેવ પ્રત્યક્ષજ્ઞાનં જનયન્તિ । તત્ર ઘ્રાણરસનત્વગિન્દ્રિયાણિ સ્વસ્થાનસ્થિતાન્યેવ ગન્ધરસ- સ્પર્શોપલમ્ભાન્ જનયન્તિ ચક્ષુઃશ્રોત્રે તુ સ્વત એવ વિષયદેશં ગત્વા સ્વસ્વવિષયં ગૃહ્ણીતઃ શ્રોત્રસ્યાપિ ચક્ષુરાદિવત્ પરિચ્છિન્નતયાભેર્યાદિદેશગમનસમ્ભવાત્ । અત એવાનુભવો "ભેરીશબ્દો મયા શ્રુતઃ" ઇતિ । વીચિતરઙ્ગાદિન્યાયેન

કર્ણશષ્કુલીપ્રદેશેઽનન્તશબ્દોત્પત્તિકલ્પનાયાં ગૌરવમ્
"ભેરીશબ્દો મયા શ્રુતઃ" ઇતિ પ્રત્યક્ષસ્ય ભ્રમત્વકલ્પનાયાં
ગૌરવં ચ સ્યાત્ ।

તદેવં વ્યાખ્યાતં પ્રત્યક્ષમ્ ।

ઇતિ વેદાન્તપરિભષાયાં પ્રત્યક્ષપરિચ્છેદઃ ।

---

## ૨ ॥ અનુમાનમ્ ॥

અથાનુમાનં નિરુપ્યતે । અનુમિતિકરણમનુમાનમ્ । અનુમિતિશ્ચ
વ્યાપ્તિજ્ઞાનત્વેન વ્યાપ્તિજ્ઞાનજન્યા । વ્યાપ્તિજ્ઞાનાનુવ્યવસાયાદેસ્તત્ત્વેન
તજ્જન્યત્વાભાવાન્નાનુમિતિત્વમ્ ।

અનુમિતિકરણં ચ વ્યાપ્તિજ્ઞાનમ્ । તત્સંસ્કારોઽવાન્તરવ્યાપારઃ ।
ન તુ તૃતીયલિઙ્ગપરામર્શોઽનુમિતૌ કરણમ્ તસ્યાનુમિતિહેતુત્વાસિદ્ધ્યા
તત્કરણત્વસ્ય દૂરનિરસ્તત્વાત્ । ન ચ સંસ્કારજન્યત્વેનાનુમિતેઃ
સ્મૃતિત્વાપત્તિઃ સ્મૃતિપ્રાગભાવજન્યત્વસ્ય સંસ્કારમાત્રજન્યત્વસ્ય
વા સ્મૃતિત્વપ્રયોજકતયા સંસ્કારધ્વંસસાધારણસંસ્કારજન્યત્વસ્ય
તદપ્રયોજકત્વાત્ ।

ન ચ યત્ર વ્યાપ્તિસ્મરણાદનુમિતિસ્તત્ર કથં સંસ્કારોહેતુરિતિ
વાચ્યમ્ વ્યાપ્તિસ્મૃતિસ્થલેઽપિ તત્સંસ્કારસ્યૈવાનિમિતિહેતુત્વાત્ ।
નહિ સ્મૃતેઃ સંસ્કારનાશકત્વનિયમઃ સ્મૃતિધારાદર્શનાત્ । ન
ચાનુબુદ્ધસંસ્કારાદપ્યનુમિત્યાપત્તિઃ તદુદ્બોધસ્યાપિ સહકારિત્વાત્ ।
એવં ચ "અયં ધૂમવાન્" ઇતિ પક્ષધર્મતાજ્ઞાને "ધૂમો
વહ્નિવ્યાપ્યઃ" ઇત્યનુભવાહિતસંસ્કારોદ્બોધે ચ સતિ "વહ્નિમાન્"
ઇત્યનુમિતિર્ભવતિ । ન તુ મધ્યે વ્યાપ્તિસ્મરણમ્ તજ્જન્યં
"વહ્નિવ્યાપ્યધૂમવાનયમ્" ઇત્યાદિ વિશિષ્ટજ્ઞાનં વા
હેતુત્વેન કલ્પનીયમ્ ગૌરવાન્માનાભાવાચ્ચ । તચ્ચ વ્યાપ્તિજ્ઞાનં
વહ્નિવિષયકજ્ઞાનાંશ એવ કરણમ્ ન તુ પર્વતવિષયકજ્ઞાનાંશ
ઇતિ "પર્વતો વહ્નિમાન્" ઇતિ જ્ઞાનસ્ય વહ્ન્યંશ એવ અનુમિતિત્વમ્
ન પર્વતાંશે તદંશે પ્રત્યક્ષત્વસ્યોપપાદિતત્વાત્ ।
વ્યાપ્તિશ્ચાશેષસાધનાશ્રયાશ્રિતસાધ્યસામાનાધિકરણ્યરૂપા ।
સા ચ વ્યભિચારાદર્શને સતિ સહચારદર્શનેન ગૃહ્યતે । તચ્ચ
સહચારદર્શનં ભૂયોદર્શનં સકૃદ્દર્શનં વેતિ વિશેષો નાદરણીયઃ

સહચારદર્શનસ્યૈવ પ્રયોજકત્વાત્ ।

તચ્ચાનુમાનમન્વયિરૂપમેકમેવ । ન તુ કેવલાન્વયિ સર્વસ્યાપિ ધર્મસ્યાસ્મન્મતે બ્રહ્મનિષ્ઠાત્યન્તાભાવપ્રતિયોગિત્વેન અત્યન્તાભાવાપ્રતિયોગિસાધ્યકત્વરૂપકેવલાન્વયિત્વસ્યાસિદ્ધેઃ । નાપ્યનુમાનસ્ય વ્યતિરેકિરૂપત્વમ્ સાધ્યાભાવે સાધનાભાવ-નિરૂપિતવ્યાપ્તિજ્ઞાનસ્ય સાધનેન સાધ્યાનુમિતાવનુપયોગાત્ । કથં તર્હિ ધૂમાદાવન્વયવ્યાપ્તિમવિદુષોઽપિ વ્યતિરેકવ્યાપ્તિ-જ્ઞાનાદનુમિતિઃ । અર્થાપત્તિપ્રમાણાદિતિ વક્ષ્યામઃ । અત એવાનુમાનસ્ય નાન્વયવ્યતિરેકિરૂપત્વમ્ વ્યતિરેકવ્યાપ્તિરૂપત્વમ્ વ્યતિરેકવ્યાપ્તિજ્ઞાનસ્ય અનુમિત્યહેતુત્વાત્ ।

તચ્ચાનુમાનં સ્વાર્થપરાર્થભેદેન દ્વિવિધમ્ । તત્ર સ્વાર્થન્તૂક્તમેવ પરાર્થન્તુ ન્યાયસાધ્યમ્ । ન્યાયો નામાવયવસમુદાયઃ । અવયવશ્ચ ત્રય એવ - પ્રતિજ્ઞાહેતૂદાહરણરૂપાઃ ઉદાહરણોપનયનિગમનરૂપા વા । ન તુ પઞ્ચ અવયવત્રયેણૈવ વ્યાપ્તિપક્ષધર્મતયોરુપદર્શનસમ્ભવેનાધિકવયવ-દ્વયસ્ય વ્યર્થત્વાત્ ।

એવમનુમાને નિરૂપિતે તસ્માદ્ બ્રહ્મભિન્નનિખિલપ્રપઞ્ચસ્ય મિથ્યાત્વસિદ્ધિઃ । તથાહિ - બ્રહ્મભિન્નં સર્વં મિથ્યા બ્રહ્મભિન્નત્વાત્ યદેવં તદેવમ્ યથા શુક્તિરૂપ્યમ્ । ન ચ દૃષ્ટાન્તસિદ્ધિઃ તસ્ય સાધિતત્વાત્ । ન ચાપ્રયોજકત્વમ્ શુક્તિરૂપ્યરજ્જુસર્પાદીનાં મિથ્યાત્વે બ્રહ્મભિન્નત્વસ્યૈ લાઘવેન પ્રયોજકત્વાત્ । મિથ્યાત્વં ચ સ્વાશ્રયત્વેનાભિમત-યાવન્નિષ્ઠાત્યન્તાભાવપ્રતિયોગિત્વમ્ । ' અભિમત '-પદં વસ્તુતઃ સ્વાશ્રયાપ્રસિદ્ધ્યાઽસમ્ભવવારણાય ' યાવત્ ' - પદમર્થાન્તરવારણાય । તદુક્તમ્ -

" સર્વેષામપિ ભાવાના સ્વાશ્રયત્વેન સમ્મતે ।
પ્રતિયોગિત્વમત્યન્તાભાવં પ્રતિ મૃષાત્મતા ॥ " ઇતિ ।

યદ્વા અયં પટ એતત્તન્તુનિષ્ઠાત્યન્તાભાવપ્રતિયોગી પટત્વાત્ પટાન્તરવત્ - ઇત્યાદ્યનુમાનં મિથ્યાત્વે પ્રમાણમ્ । તદુક્તમ્ -

" અંશિનઃ સ્વાંશગાત્યન્તાભાવસ્ય પ્રતિયોગિનઃ ।
અંશિત્વાદિતરાંશીવ દિગેષૈવ ગુણાદિષુ ॥ " ઇતિ ।

ન ચ ઘટાદેર્મિથ્યાત્વે " સન્ ઘટઃ " ઇતિ પ્રત્યક્ષેણ બાધઃ અધિષ્ઠાનબ્રહ્મસત્તયાસ્તત્ર વિષયતયા ઘટાદેઃ

સત્યત્વાસિદ્ધેઃ ।

ન ચ નીરૂપસ્ય બ્રહ્મણઃ કથં ચાક્ષ્ષાદિજ્ઞાન્વિષયતેતિ વાચ્યમ્  નીરૂપસ્યાપિ રૂપાદેઃ પ્રત્યક્ષવિષયત્વાત્ । ન ચ નીરૂપસ્ય દ્રવ્યસ્ય ચક્ષુરાદ્યયોગ્યત્વમિતિ નિયમઃ  મન્મતે બ્રહ્મણો દ્રવ્યત્યાસિદ્ધેઃ । ગુણાશ્રયત્વં સમવાયિકારણત્વં વા દ્રવ્યત્વમ્ ઇતિ તેઽભિમતમ્ । ન હિ નિર્ગુણસ્ય બ્રહ્મણો ગુણાશ્રયતા  નાપિ સમવાયિકારણતા  સમવાયાસિદ્ધેઃ । અસ્તુ વા દ્રવ્યત્વં બ્રહ્મણઃ  તથાપિ નીરૂપસ્ય કાલસ્યેવ ચાક્ષુષાદિ - જ્ઞાનવિષયત્વે ન વિરોધઃ ।

યદ્વા ત્રિવિધં સત્ત્વમ્  - પારમાર્થિકં વ્યાવહારિકં પ્રાતિભાસિકં ચેતિ । પારમાર્થિકં સત્ત્વં બ્રહ્મણઃ  વ્યાવહારિકં સત્ત્વમાકાશાદેઃ  પ્રાતિભાસિકં સત્ત્વં શુક્તિરજતાદેઃ । તથા ચ " ઘટઃ સન્ " ઇતિ પ્રત્યક્ષસ્ય વ્યાવહારિકસત્ત્વવિષયત્વેન પ્રામાણ્યમ્ । અસ્મિન્ પક્ષે ઘટાદેર્બ્રહ્મણિ નિષેધો ન સ્વરૂપેણ કિન્તુ પારમાર્થિકત્વેનૈવેતિ ન વિરોધઃ । અસ્મિન્ પક્ષે ચ મિથ્યાત્વલક્ષણે પારમાર્થિકત્વાવચ્છિન્નપ્રતિયોગિતાકત્વ - મત્યન્તાભાવવિશેષણં દ્રષ્ટવ્યમ્ । તસ્માદુપપન્નં મિથ્યાત્વાનુમાનમિતિ ।

ઇતિ વેદાન્તપરિભાષાયામનુમાનપરિચ્છેદઃ ।

---

## ૩  ઉપમાનમ્ ।

અથોપમાનં નિરુપ્યતે । તત્ર સાદૃશ્યપ્રમાકરણમુપમાનમ્ । તથા હિ - નગરેષુ દૃષ્ટગોપિણ્ડસ્ય પુરુષસ્ય વનં ગતસ્ય ગવેયેન્દ્રિયસન્નિકર્ષે સતિ ભવતિ પ્રતીતિઃ " અયં પિણ્ડો ગોસદૃશઃ " ઇતિ । તદનન્તરં ચ ભવતિ નિશ્ચયઃ " અનેન સદૃશી મદીયા " ગૌઃ " ઇતિ । તત્રાન્વયવ્યતિરેકાભ્યાં ગવયનિષ્ઠગોસાદૃશ્યજ્ઞાનં કરણમ્  ગોનિષ્ઠગવયસાદૃશ્યજ્ઞાનં ફલમ્ ।

ન ચેદં પ્રત્યક્ષેણ સમ્ભવતિ  ગોપિણ્ડસ્ય તદેન્દ્રિયાસન્નિકર્ષાત્ । નાપ્યનુમાનેન  ગવયનિષ્ઠગોસાદૃશ્યસ્ય અતલ્લિઙ્ગત્વાત્ । નાપિ

મદીયા ગૌરેતદ્ગવયસદૃશી

એનન્નિષ્ઠસાદૃશ્યપ્રતિયોગિત્વાત્

યો યદ્ગતસાદૃશ્યપ્રતિયોગી સ તત્સદૃશઃ

યથા મૈત્રનિષ્ઠસાદૃશ્યપ્રતિયોગી ચત્રો મૈત્રસદૃશઃ -

ઇત્યનુમાનાત્ તત્સમ્ભવૈતિ વાચ્યમ્ । એવંવિધાનુમાનાનવતારેઽપિ " અનેન સદૃશી મદીયા ગૌઃ " ઇતિ પ્રતીતેરનુભવસિદ્ધત્વાત્ " ઉપમિનોમિ " ઇત્યનુવ્યવસાયાચ્ચ । તસ્માદુપમાનં માનાન્તરમ્ ।

ઇતિ વેદાન્તપરિભાષાયામુપમાનપરિચ્છેદઃ ।

## ૪ આગમઃ ।

અથાગમો નિરૂપ્યતે । યસ્ય વાક્યસ્ય તાત્પર્ય વિષયીભૂતસંસર્ગો માનાન્તરેણ ન બાધ્યતે તદ્વાક્યં પ્રમાણમ્ । વાક્યજન્યજ્ઞાને ચ આકાંક્ષાયોગ્યતાઽઽસત્તયસ્તાત્પર્યજ્ઞાનં ચ ઇતિ ચત્વારિ કારણાનિ ।

તત્ર પદાર્થાનાં પરસ્પરજિજ્ઞાસાવિષયત્વયોગ્યત્વમાકાંક્ષા । ક્રિયાશ્રવણે કારકસ્ય કારકશ્રવણે ક્રિયાયાઃ કરણશ્રવણે ઇતિકર્તવ્યતાયાશ્ચ જિજ્ઞાસાવિષયત્વાત્ ઽજિજ્ઞાસોરપિ વાક્યાર્થબોધાત્ ’ યોગ્યત્વ " મુપાત્તમ્ । તદવચ્છેદકં ચ ક્રિયાત્વકારકત્વા- દિકમિતિનાતિવ્યાપ્તિઃ ગૌરશ્વ ઇત્યાદૌ । અભેદાન્વયે ચ સમાનવિભક્તિકપદ- પ્રતિપાદ્યત્વં તદવચ્છેદકમિતિ " તત્ત્વમસ્યા " દિવાક્યેષુ નાવ્યાપ્તિઃ ।

એતાદૃશાકાંક્ષાભિપ્રાયેણૈવ બલાબલાધિકરણે " સા વૈશ્વદેવ્યામિક્ષા વાજિભ્યો વાજિનમ્ " ઇત્યત્ર વૈશ્વદેવ - યાગસ્યામિક્ષાન્વિતત્વેન ન વાજિનાકાંક્ષા ઇત્યાદિવ્યવહારઃ । નનુ તત્રાપિ વાજિનસ્ય જિજ્ઞાસાઽવિષયત્વેઽપિ તદ્યોગ્યત્વમસ્ત્યેવ પ્રદેયદ્રવ્યત્વસ્ય યાગનિરુપિતજિજ્ઞાસાવિષયતાવચ્છેદકત્વાદિતિ ચેત્ ન સ્વસમાનજાતીયપદાર્થાવયબોધવિરહસહકૃતપ્રદેય - દ્રવ્યત્યસ્યૈવ તદવચ્છેદકત્વેન વાજિનદ્રવ્યસ્ય સ્વસમાન - જાતીયામિક્ષાદ્રવ્યાન્વયબોધસહકૃતત્વેન તાદૃશાવચ્છેદકત્વાભાવાત્ । આમિક્ષાયાન્તુ નૈવમ્ વાજિનાન્વયસ્ય તદાનુપસ્થિત્વાત્ । ઉદાહરણાન્તરેષ્વપિ દુર્બલત્વપ્રયોજક આકાંક્ષાવિરહ એવ દ્રષ્ટવ્યઃ ।

યોગ્યતા તાત્પર્યવિષયસંસર્ગાબાધઃ । " વહ્નિના સિઞ્ચતિ " ઇત્યાદૌ તાદૃશસંસર્ગબાધાન્ન યોગ્યતા । " સ પ્રજાપતિરાત્મનો વપામુદખિદત્ " ઇત્યાદાવપિ તાત્પર્યવિષયીભૂતપશુપ્રાશસ્ત્યાબાધાત્ યોગ્યતા । " તત્ત્વમસ્યા " - દિવાક્યેષ્વપિ વાચ્યાભેદબાધેઽપિ

લક્ષ્યસ્વરૂપાભેદે બાધાભાવાત્ યોગ્યતા ।
આસત્તિશ્ચાવ્યવધાનેન પદજન્યપદાર્થોપસ્થિતિઃ ।
માનાન્તરોપસ્થાપિતપદાર્થસ્યાન્વયબોધાભાવાત્
' પદજન્યા ' ઇતિ । અત એવાશ્રુતસ્થલે તત્તત્પદાધ્યાહારઃ ।
' દ્વારમ્ ' ઇત્યાદૌ ' પિધેહિ ' ઇતિ । અત એવ ' ઇષે ત્વા '
ઇત્યાદિમન્ત્રે ' છિનદ્મિ ' ઇતિ પદાધ્યાહારઃ । અત એવ
વિકૃતિષુ " સૂર્યાય જુષ્ટં નિર્વપામિ " ઇતિ પદપ્રયોગઃ ।

પદાર્થશ્ચ દ્વિવિધઃ - શક્યો લક્ષ્યશ્ચેતિ । તત્ર શક્તિર્નામ
પદાનામર્થેષુ મુખ્યા વૃત્તિઃ । યથા ' ઘટ ' - પદસ્ય
પૃથુબુધ્નોદરાદ્યાકૃતિવિશિષ્ટે વસ્તુવિશેષે વૃત્તિઃ । સા ચ
શક્તિઃ પદાર્થાન્તરમ્  સિદ્ધાન્તે કારણેષુ કાર્યાનુકૂલશક્તિમાત્રસ્ય
પદાર્થાન્તરત્વાત્ । સા ચ તત્તત્પદજન્યપદાર્થજ્ઞાનરૂપકાર્યાનુમેયા ।
તાદૃશશક્તિવિષયત્વં શક્યત્વમ્ ।

તચ્ચ જાતેરેવ  ન વ્યક્તેઃ  વ્યક્તીનામાનન્ત્યેન ગુરુત્વાત્ ।
કથં તર્હિ ગવાદિપદાદ્વ્યક્તિમાનમિતિ ચેત્  જાતેર્વ્યક્તિ -
સમાનસંવિત્સંવેદ્યત્વાદિતિ બ્રૂમઃ । યદ્વા ગવાદિપદાનાં
વ્યક્તૌ શક્તિઃ સ્વરૂપસતી  ન તુ જ્ઞાતા  હેતુઃ  જાતૌ તુ સા
જ્ઞાતા હેતુઃ । ન ચ વ્યક્ત્યંશે શક્તિજ્ઞાનમપિ કારણમ્
ગુઅરવાત્ । જાતિશક્તિમત્ત્વજ્ઞાને સતિ વ્યક્તિશક્તિમત્ત્વજ્ઞાનં
વિના વ્યક્તિધીવિલમ્બાભાવાચ્ચ । અત એવ ન્યાયમતેઽપ્યન્વયે
શક્તિઃ સ્વરૂપસતીતિ સિદ્ધાન્તઃ ।

જ્ઞાયમાનશક્તિવિષયત્વમેવ વાચ્યત્વમિતિ જાતિરેવ વાચ્યા ।
અથવા વ્યક્તર્લક્ષણયાઽવગમઃ । યથા " નીલો ઘટઃ " ઇત્યત્ર
' નીલ ' - શબ્દસ્ય નીલગુણવિશિષ્ટે લક્ષણા  તથા
જાતિવાચકસ્ય તદ્વિશિષ્ટે લક્ષણા । તદુક્તમ્ " અનન્યલભ્યઃ
શબ્દાર્થઃ" ઇતિ । એવં શક્યો નિરૂપિતઃ ।

અથ ' લક્ષ્ય '  - પદાર્થો નિરૂપ્યતે । તત્ર લક્ષણાવિષયો
લક્ષ્યઃ । લક્ષણા ચ દ્વિવિધા - કેવલલક્ષણા લક્ષિતલક્ષણા
ચેતિ । તત્ર શક્યસાક્ષાત્સમ્બન્ધઃ કેવલક્ષણા । યથા
" ગઙ્ગાયાં ઘોષઃ " ઇત્યત્ર પ્રવાહસાક્ષાત્સમ્બન્ધિનિ તીરે
' ગઙ્ગા ' - પદસ્ય કેવલલક્ષણા । યત્ર શક્યપરમ્પરા -
સમ્બન્ધેનાર્થાન્તરપ્રતીતિસ્તત્ર લક્ષિતલક્ષણા  યથા

' દ્વિરેફ ' - પદસ્ય રેફદ્વયે શક્તસ્ય ' ભ્રમર ' -
પદઘટિત - પરમ્પરાસમ્બન્ધેન મધુકરે વૃત્તિઃ । ગૌણ્યપિ લક્ષિતલક્ષણૈવ ।
યથા " સિંહો માનવકઃ " ઇત્યત્ર ' સિંહ ' - શબ્દવાચ્ય
સમ્બન્ધિક્રૌર્યાદિસમ્બન્ધેન માનવકસ્ય પ્રતીતિઃ ।

પ્રકારાન્તરેણ લક્ષણા ત્રિવિધા - જહલ્લક્ષણા અજહલ્લક્ષણા
જહદજહલ્લક્ષણા । તત્ર શક્યમનન્તર્ભાવ્ય યત્રાર્થાન્તર -
પ્રતીતિસ્તત્ર જહલ્લક્ષણા । યથા " વિષં ભુંક્ષ્વ " ઇત્યત્ર સ્વાર્થં
વિહાય શત્રુગૃહે ભોજનનિવૃત્તિર્લક્ષ્યતે । યત્ર શક્યાર્થ -
મન્તર્ભાવ્યૈવાર્થાન્તરપ્રતીતિઃ તત્રાજહલ્લક્ષણા યથા
" શુક્લો ઘટઃ " ઇતિ । અત્ર હિ ' શુક્લ ' - શબ્દઃ સ્વાર્થં
શુક્લગુણમન્તર્ભાવ્યૈવ તદ્વતિ દ્રવ્યે લક્ષણયા વર્તતે ।
યત્ર હિ વિશિષ્ટવાચકઃ શબ્દ એકદેશં વિહાય એકદેશે
વર્તતે તત્ર જહદજહલ્લક્ષણા યથા " સોઽયં
દેવદત્તઃ " ઇતિ । અત્ર હિ પદદ્વયવાચ્યયોર્વિશિષ્ટયોરૈક્યા -
નુપપત્યા પદદ્વયસ્ય વિશેષ્યમાત્રપરત્વમ્ । યથા વા
" તત્ત્વમસિ " ઇત્યાદૌ ' તત્ ' - પદ્વાચ્યસ્ય
સર્વજ્ઞત્વાદિવિશિષ્ટસ્ય ' ત્વં ' - પદવાચ્યેનાન્તઃકરણ -
વિશિષ્ટેનૈક્યાયોગાત્ ઐક્યસિદ્ધ્યર્થં સ્વરૂપે લક્ષણેતિ
સામ્પ્રદાયિકાઃ ।

વયન્તુ બ્રૂમઃ - " સોઽયં દેવદત્તઃ ," " તત્ત્વમસિ " ઇત્યાદૌ
વિશિષ્ટવાચકપદાનામેકદેશપરત્વેઽપિ ન લક્ષણા
શક્ત્યુપસ્થિતવિશિષ્ટયોઃ અભેદાન્વયાનુપપત્તૌ વિશેષ્યયોઃ
શક્ત્યુપસ્થિતયોરેવ અભેદાન્વયાવિરોધાત્ । યથા
" ઘટોઽનિત્યઃ " ઇત્યત્ર ' ઘટ ' - પદવાચ્યૈકદેશઘટત્વસ્ય -
અયોગ્યત્વેઽપિ યોગ્યઘટવ્યક્ત્યા સહાનિત્યત્વાન્વયઃ ।
યત્ર પદાર્થૈકદેશસ્ય વિશેષણતયોપસ્થિતિઃ તત્રૈવ
સ્વાતન્ત્ર્યેણૌપસ્થિતયે લક્ષણભ્યુપગમઃ । યથા
" નિત્યો ઘટઃ " ઇત્યત્ર ' ઘટ " - પદાત્ ઘટત્વસ્ય શક્ત્યા
સ્વાતન્ત્ર્યેણાનુપસ્થિત્યા તાદૃશોપસ્થિત્યર્થં
' ઘટ-પદસ્ય ઘટત્વે લક્ષણા । એવમેવ " તત્ત્વમસિ "
ઇત્યાદિવાક્યેઽપિ ન લક્ષણા શક્ત્યા સ્વાતન્ત્ર્યેણોપસ્થિતયોઃ

' તત્ત્વં ' - પદાર્થયોરભેદાન્વયે બાધકાભાવાત્ । અન્યથા " ગેહે ઘટઃ " " ઘટે રૂપમ્ " " ઘટમાનય " ઇત્યાદૌ ઘટત્વગેહત્વાદેરભિમતાન્વયબોધાયોગ્યતયા તત્રાપિ ' ઘટા ' - દિપદાનાં વિશેષ્યમાત્રપરત્વં લક્ષણયૈવ સ્યાત્ । તસ્માત્ " તત્ત્વમસિ " ઇત્યાદિવાક્યેષુ આચાર્યાણાં લક્ષણોક્તિરભ્યુપગમવાદેન બોધ્યા ।

જહદજહલ્લક્ષણોદાહરણન્તુ " કાકેભ્યો દધિ રક્ષ્યતામ્ " ઇત્યાદ્યેવ  તત્ર શક્યકાકત્વપરિત્યાગેન અશક્યદધ્યુપઘાતકત્વ-પુરસ્કારેણાકાકેઽપિ ' કાક ' - શબ્દપ્રવૃત્તેઃ ।

લક્ષણાબીજન્તુ તાત્પર્યાનુપપત્તિરેવ  ન તુ અન્વયાનુપપત્તિઃ " કાકેભ્યો દધિ રક્ષ્યતામ્ " ઇત્યત્ર અન્વયાનુપપત્ત્યભાવાત્ " ગઙ્ગાયાં ઘોષઃ " ઇત્યાદૌ તાત્પર્યાનુપપત્તેરપિ સમ્ભવાત્ ।

લક્ષણા ચ ન પદમાત્રવૃત્તિઃ  કિન્તુ વાક્યવૃત્તિરપિ । યથા " ગમ્ભીરાયાં નદ્યાં ઘોષઃ " ઇત્યત્ર " ગમ્ભીરાયાં નદ્યામ્ " ઇતિ પદદ્વયસમુદાયસ્ય તીરે લક્ષણા । નનુ વાક્યસ્યાશક્તતયા કથં શક્યસમ્બન્ધરૂપા લક્ષણા  ઉચ્યતે । શક્ત્યા યત્ પદસમ્બન્ધેન જ્ઞાપ્યતે તત્સમ્બન્ધો લક્ષણા । શક્તિજ્ઞાપ્યશ્ચ યથા પદાર્થસ્તથા વાક્યાર્થોઽપીતિ ન કાચિદનુપપત્તિઃ ।

એવમર્થવાદવાક્યાનાં પ્રશંસારૂપાણાં પ્રાશસ્ત્યે લક્ષણા " સોઽરોદીત્ " ઇત્યાદિનિન્દાર્થવાદવાક્યાનાં નિન્દિતત્વે લક્ષણા । અર્થવાદગતપદાનાં પ્રાશત્યાદિલક્ષણાભ્યુપગમે એકેન પદેન લક્ષણયા તદુપસ્થિતિસમ્ભવે પદાન્તરવૈયર્થ્ય સ્યાત્ । એવં ચ વિધ્યપેક્ષિતપ્રાશસ્ત્યરૂપપદાર્થપ્રત્યાયકતયા અર્થવાદપદસમુદાયસ્ય પદસ્થાનીયતયા વિધિવાક્યેનૈકવાક્યત્વં ભવતિ  ઇત્યર્થવાદવાક્યાનાં પદૈકવાક્યતા । ક્વ તર્હિ વાક્યૈકવાક્યતા । યત્ર પ્રત્યેકં ભિન્નભિન્નસંસર્ગપ્રતિપાદકયોર્વાક્યયોરાકાંક્ષાવશેન મહાવાક્યાર્થબોધકત્વમ્ । યથા " દર્શપૂર્ણમાસાભ્યાં સ્વર્ગકામો યજેત " ઇત્યાદિવાક્યાનાં " સમિધો યજતિ " ઇત્યાદિવાક્યાનાં ચ પરસ્પરોપેક્ષિતાઙ્ગાઙ્ગિભાવબોધકતયા એકવાક્યતા । તદુક્તં ભટ્ટપાદૈઃ -

" સ્વાર્થબોધે સમાપ્તાનામઙ્ગાઙ્ગિત્વાદ્યપેક્ષયા ।

વાક્યાનામેકવાક્યત્વં પુનઃ સંહત્ય જાયતે ॥" ઇતિ ।

એવં દ્વિવિધોઽપિ પદાર્થો નિરૂપિતઃ । તદુપસ્થિતિશ્ચાસત્તિઃ । સા ચ શાબ્દબોધે હેતુઃ તથૈવાન્વયવ્યતિરેકદર્શનાત્ । એવં મહાવાક્યાર્થબોધેઽવાન્તરવાક્યાર્થબોધો હેતુઃ તથૈવાન્વયા - દ્યવધારણાત્ ।

ક્રમપ્રાપ્તં તાત્પર્યં નિરૂપ્યતે । તત્ર તત્પ્રતીતીચ્છયોચ્ચરિતત્વં ન તાત્પર્યમ્ અર્થજ્ઞાનશૂન્યેન પુરુષેણોચ્ચરિતાદ્વેદાદર્થપ્રત્યાયા- ભાવપ્રસઙ્ગાત્ "અયમધ્યાપકોઽવ્યુત્પન્નઃ" ઇતિ વિશેષદર્શિનેન તાત્પર્યભ્રમસ્યાપ્યભાવાત્ । ન ચેશ્વરીયતાત્પર્યજ્ઞાનાત્ તત્ર શાબ્દબોધ ઇતિ વાચ્યમ્ ઈશ્વરાનઙ્ગીકર્તૃરપિ તદ્વાક્યાર્થ- પ્રતિપત્તિદર્શનાત્ ઉચ્યતે । તત્પ્રતીતિજનનયોગ્યત્વં તાત્પર્યમ્ । "ગેહે ઘટઃ" ઇતિ વાક્યં ગેહે ઘટસંસર્ગપ્રતીતિજનનયોગ્યમ્ ન તુ પટસંસર્ગપ્રતીતિજનનયોગ્યમિતિ તદ્વાક્યં ઘટસંસર્ગપરમ્ ન તુ પટસંસર્ગપરમિત્યુચ્યતે ।

નનુ "સૈન્ધવમાનય" ઇત્યાદિવાક્યં યદા લવણાનયન - પ્રતીતીચ્છયા પ્રયુક્તં તદાપિ અશ્વસંસર્ગપ્રતીતિજનને સ્વરૂપયોગ્યતાસત્ત્વાત્ લવણપરત્વજ્ઞાનદશાયામશ્વાદિ - સંસર્ગજ્ઞાનાપત્તિરિતિ ચેત્ ન તદિતરપરતીતીચ્છયા - નુચ્ચરિતત્વસ્યાપિતાત્પર્યં પ્રતિ વિશેષણત્વાત્ । તથા ચ યદ્વાક્યં યત્પ્રતીતિજનનસ્વરૂપયોગ્યત્વે સતિ યદન્યપ્રતીતીચ્છયા નોચ્ચરિતમ્ તદ્વાક્યં તત્સંસર્ગ - પરમિત્યુચ્યતે । શુકાદિવાક્યે અવ્યુત્પન્નોચ્ચરિતવેદવાક્યાદૌ ચ પ્રતીતીચ્છાયા એવાભાવેન તદન્યપ્રતીતીચ્છયો - ચ્ચરિતત્વાભાવેન લક્ષણસત્ત્વાન્નાવ્યાપ્તિઃ । ન ચોભયપ્રતીતીચ્છયોચ્ચરિતેઽવ્યાપ્તિઃ તદન્યમાત્ર - પ્રતીતીચ્છયાઽનુચ્ચરિતત્વસ્ય વિવક્ષિતત્વાત્ ।

ઉક્તપ્રતીતિમાત્રજનનયોગ્યતાયાશ્ચાવચ્છેદિકા શક્તિઃ । અસ્માકં મતે સર્વત્ર કારણતાયાઃ શક્તેરેવાવચ્છેદકત્વાન્ન કોઽપિ દોષઃ ।

એવં તાત્પર્યસ્ય તત્પ્રત્તિતિજનકત્વરૂપસ્ય શાબ્દજ્ઞાનજનકત્વે સિદ્ધે ચતુર્થવર્ણકે તાત્પર્યસ્ય શાબ્દજ્ઞાનહેતુત્વેનિરાકરણવાક્યં

તત્પ્રતીતીચ્છયોચ્ચરિતત્વરૂપતાતાત્પર્યનિરાકરણપરમ્ અન્યથા
તાત્પર્યનિશ્ચયફલકવેદાન્તવિચારવૈયર્થ્યપ્રસઙ્ગાત્ । કેચિત્તુ -
શાબ્દજ્ઞાત્વાવચ્છેદેન ન તાત્પર્યજ્ઞાનં હેતુરિત્યેવંપરમ્
ચતુર્થવર્ણકવાક્યમ્ તાત્પર્યસંશયવિપર્યયોત્તરશાબ્દજ્ઞાનવિશેષે
ચ તાત્પર્યજ્ઞાનં હેતુરેવ ઇદં વાક્યમેતત્પરમુતાન્યપરમિતિ સંશયે
તદ્વિપર્યયે ચ તદુત્તરવાક્યાર્થવિશેષનિશ્ચયસ્ય તાત્પર્યનિશ્ચયં
વિનાઽનુપપત્તેરિત્યાહુઃ ।

તચ્ચ તાત્પર્યં વેદે મીમાંસાપરિશોધિતન્યાયાદેવાવધર્યતે
લોકે તુ પ્રકરણાદિના । તત્ર લૌકિકવાક્યાનાં માનાન્તરા -
વગતાર્થતયાઽનુવાદકત્વમ્ વેદે તુ વાક્યાર્થસ્યાપૂર્વતયા
નાનુવાદકત્વમ્ । તત્ર લોકે વેદે ચ કાર્યપરાણામિવ સિદ્ધર્થાનામપિ
પ્રામાણ્યમ્ " પુત્રસ્તે જાતઃ " ઇત્યાદિષુઅ સિદ્ધાર્થેઽપિ પદાનાં
સામર્થ્યાવધારણાત્ । અત એવ વેદાન્તવાક્યાનાં બ્રહ્મણિ પ્રામાણ્યમ્ ।
યથ ચૈતત્ તથા વિષયપરિચ્છેદે વક્ષ્યતે ।

તત્ર વેદાનાં નિત્યસર્વજ્ઞપરમેશ્વરપ્રણીતત્વેન પ્રામાણ્યમિતિ -
નૈયાયિકાઃ । વેદાનાં નિત્યત્વેન નિરસ્તસમસ્તપુંદૂષણતયા
પ્રામાણ્યમિથ્યધ્વરમીમાંસકાઃ । અસ્માકં તુ મતે વેદો ન નિત્યઃ
ઉત્પત્તિમત્ત્વાત્ । ઉત્પત્તિમત્ત્વં ચ " અસ્ય મહતો ભૂતસ્ય
નિઃશ્વસિતમેતદ્યદૃગ્વેદો યજુર્વેદઃ સામવેદોઽથર્વવેદઃ " ઇત્યાદિશ્રુતેઃ ।

નાપિ વેદાનાં ત્રિક્ષણવસ્થાયિત્વમ્ " ય એવ વેદો
દેવદત્તેનાધીતઃ સઃ એવ મયામિ " ઇત્યાદિપ્રત્યભિજ્ઞાવિરોધાત્ ।
અત એવ ગકારાદિવર્ણાનામપિ ન ક્ષણિકત્વમ્ " સોઽયં ગકારઃ "
ઇત્યાદિપ્રત્યભિજ્ઞાવિરોધાત્ । તથા ચ વર્ણપદવાક્યસમુદાયસ્ય
વેદસ્ય વિયદાદિવત્ સૃષ્ટિકાલીનોત્પત્તિકત્વં પ્રલયકાલીન -
ધ્વંસપ્રતિયોગિત્વં ચ ન તુ મધ્યે વર્ણાનામુત્પત્તિવિનાશૌ
અનન્તગકારાદિકલ્પનાયાં ગૌરવાત્ । અનુચ્ચારણદશાયાં
વર્ણાનામનભિવ્યક્તિસ્તદુચ્ચારણરૂપવ્યઞ્જકાભાવાત્ ન
વિરુધ્યતે અન્ધકારસ્થઘટાનુપલમ્ભવત્ । " ઉત્પન્નો
ગકારઃ " ઇત્યાદિપ્રત્યયસ્તુ " સોઽયં ગકારઃ "
ઇત્યાદિપ્રત્યભિજ્ઞાવિરોધાદપ્રમાણમ્ । વર્ણાભિવ્યઞ્જક -
ધ્વનિગતોત્પત્તિનિરૂપિતપરમ્પરાસમ્બન્ધવિષયત્વેન

પ્રમાણં વા । તસ્માન્ન વેદાનાં ક્ષણિકત્વમ્ ।

નનુ ક્ષણિકત્વાભાવેઽપિ વિયદાદિપ્રપઞ્ચવદુત્પત્તિમત્વેન પરમેશ્વરકર્તૃકતયા પૌરુષેયત્વાદપૌરુષેયત્વં વેદાનામિતિ તવ સિદ્ધાન્તો ભજ્યેત ઇતિ ચેત્ ન । ન હિ તાવત્ પુરુષેણ ઉચ્ચાર્યમાણત્વં પૌરુષેયત્વમ્ ગુરુમતેઽપ્યધ્યાપકપરમ્પરયા પૌરુષેયત્વાપત્તેઃ । નાપિ પુરુષાધીનોત્પત્તિકત્વં પૌરુષેયત્વમ્ નૈયાયિકાભિમતપૌરુષેયત્વાનુમાનેઽસ્મદાદિના સિદ્ધસાધનાપત્તેઃ । કિન્તુ સજાતીયોચ્ચારણાનપેક્ષોચ્ચારણવિષયત્વમ્ । તથા ચ સર્ગાદ્યકાલે પરમેશ્વરઃ પૂર્વસર્ગસિદ્ધવેદાનુપૂર્વીસમાનાનુપૂર્વીકં વેદં વિરચિતવાન્ ન તુ તદ્વિજાતીયં વેદમિતિ ન સજાતીયોચ્ચારણ - અનપેક્ષોચ્ચારણવિષયત્વં પૌરુષેયત્વં વેદસ્ય । ભારતાદીનાન્તુ સજાતીયોચ્ચારણમનપેક્ષ્યૈવોચ્ચારણમિતિ તેષાં પૌરુષેયત્વમ્ । એવં પૌરુષેયાપૌરુષેયભેદેન દ્વિવિધ આગમો નિરૂપિતઃ ।

ઇતિ વેદાન્તપરિભાષાયામાગમપરિચ્છેદઃ ।

---

## ૫ અર્થાપત્તિઃ ।

ઇદાનીમર્થાપત્તિર્નિરૂપ્યતે । તત્રોપપાદ્યજ્ઞાનેનોપપાદકકલ્પન - મર્થર્થાપ્તિઃ । તત્રોપપાદ્યજ્ઞાનં કરણમ્ ઉપપાદકજ્ઞાનં ફલમ્ । યેન વિના યદનુપપન્નં તત્ તત્રોપપાદ્યમ્ । યસ્યાભાવે યસ્યાનુપપત્તિઃ તત્ તત્રોપપાદકમ્ । યથા રાત્રિભોજનેન વિના દિવાઽભુઞ્જાનસ્ય પીનત્વમનુપપન્નમ્ ઇતિ તાદૃશં પીનત્વમુપપાદ્યમ્ યથા વા રાત્રિભોજનસ્યાભાવે તાદૃશ - પીનત્વસ્યાનુપપત્તિઃ ઇતિ રાત્રિભોજનમુપપાદકમ્ ।

સા ચાર્થાપત્તિર્દ્વિવિધા - દૃષ્ટાર્થાપત્તિઃ શ્રુતાર્થાપત્તિશ્ચેતિ । તત્ર દૃષ્ટાર્થાપત્તિર્યથા " ઇદં રજતમ્ " ઇતિ પુરોવર્તિનિ પ્રતિપન્નસ્ય રજતસ્ય " નેદં રજતમ્ " ઇતિ તત્રૈવ નિષિધ્યમાનત્વં સત્યત્વઽનુપપન્નમ્ ઇતિ રજતસ્ય સદ્ભિન્નત્વં સત્યત્વાત્યન્તાભાવવત્ત્વં વા મિથ્યાત્વં કલ્પયતિ । શ્રુતાર્થાપત્તિર્યથા યત્ર શ્રૂયમાણવાક્યસ્ય સ્વાર્થાનુપપત્તિમુખેન અર્થાન્તરકલ્પનમ્ । યથા " તરતિ શોકમાત્મવિત્ " ઇત્યત્ર શ્રુતસ્ય શોકશબ્દવાચ્યબન્ધજાતસ્ય જ્ઞાનનિવર્ત્યત્વસ્યાન્યથા -

નુપપત્યા બન્ધસ્ય મિથ્યાત્વં કલ્પતે । યથા વા " જીવી
દેવદત્તો " ગૃહે ન " ઇતિ વાક્યશ્રવણાનન્તરં જીવિનો ગૃહાસત્ત્વં
બહિઃસત્ત્વં કલ્પયતિ ।

શ્રુતાર્થાપત્તિશ્ચ દ્વિવિધા - અભિધાનાનુપપત્તિઃ અભિહિતાનુપપત્તિશ્ચ ।
તત્ર યત્ર વાક્યૈકદેશશ્રવણેઽન્વયાભિધાનાનુપપત્ત્યા અન્વયાભિધાનોપયોગિ
પદાન્તરં કલ્પ્યતે તત્રાભિધાનાનુપપત્તિઃ । યથા ' દ્વારમ્ ' ઇત્યત્ર
' પિધેહિ ' ઇતિ પદાધ્યાહારઃ યથા વા " વિશ્વજિતા વિજેત "
ઇત્યત્ર ' સ્વર્ગકામ ' - પદાધ્યાહારઃ ।

નનુ ' દ્વારમ્ ' ઇત્યાદાવન્વયાભિધાનાત્ પૂર્વમ્ ઇદમન્વયાભિધાનં
પિધાનાપસ્થાપકપદં વિનાઽનુપાપન્નમિતિ કથં જ્ઞાનમિતિ ચેત્ ન
' અભિધાન ' - પદેન કરણવ્યુત્પત્યા તાત્પર્યસ્ય વિવક્ષિતત્વાત્ ।
તથા ચ દ્વારકર્મકપિધાનક્રિયાસંસર્ગપરત્વં પિધાનોપસ્થાપકપદં
વિનાઽનુપપન્નમિતિ જ્ઞાનં તત્રાપિ સમ્ભાવ્યતે ।

અભિહિતાનુપપત્તિસ્તુ યત્ર વાક્યાવગતોઽર્થોઽનુપપન્નત્વેન જ્ઞાતઃ
સન્નર્થાન્તરં કલ્પયતિ તત્ર દ્રષ્ટવ્યા । તથા " સ્વર્ગકામો જ્યોતિષ્ટોમેન
યજેત " ઇત્યત્ર સ્વર્ગસાધનત્વસ્ય ક્ષણિકયાગગતતયાઽવગતસ્યા -
નુપપત્ત્યા મધ્યવર્ત્યપૂર્વં કલ્પ્યતે ।

ન ચેયમર્થાપત્તિરનુમાનેઽન્તર્ભવિતુમર્હતિ અન્વયવ્યાપ્ત્ય -
જ્ઞાનેનાન્વયિન્યનન્તર્ભાવાત્ । વ્યતિરેકિણશ્ચાનુમાનત્વં પ્રાગેવ
નિરસ્તમ્ । અત એવાર્થાપત્તિસ્થલે ' અનુમિનોમિ ' ઇતિ નાનુવ્યવસાયઃ
કિન્તુ " અનેન ઇદં કલ્પયામિ " ઇતિ ।

નનુ અર્થાપત્તિસ્થલે " ઇદમનેન વિનાઽનુપપન્નમિતિ જ્ઞાનકરણમ્ "
ઇત્યુક્તમ્ તત્ર કિમિદં " તેન વિનાઽનુપપન્નત્વમ્ " ।
તદભાવવ્યપકાભાવપ્રતિયોગિત્વમિતિ બ્રૂમઃ ।

એવમર્થાપત્તેર્માનાન્તરત્વસિદ્ધૌ વ્યતિરેકિ નાનુમાનાન્તરમ્
" પૃથિવીતરેભ્યો ભિદ્યતે " ઇઅત્યાદૌ ગન્ધવત્ત્વમિતરભેદં
વિનાઽનુપપન્નમિત્યાદિજ્ઞાનસ્ય કરણત્વાત્ । અત
એવાનુવ્યવસાયઃ " પૃથિવ્યામિતરભેદં કલ્પયામિ " ઇતિ ।

ઇતિ વેદાન્તપરિભાષાયામર્થાપત્તિપરિચ્છેદઃ ।

## ૬ અનુપલબ્ધિ ।

ઇદાનીં ષષ્ઠં પ્રમાણં નિરૂપ્યતે । જ્ઞાનકરણાજન્યાભાવાનુભવા - સાધારણકારણમનુપલબ્ધિરૂપં પ્રમાણમ્ । અનુમાનાદિજન્યા - તીન્દ્રિયાભાવાનુભવહેતાવનુમાનાદાવતિવ્યાપ્તિવારણાયાજન્યાન્તં પદમ્ । અદૃષ્ટાદૌ સાધારણકારણેઽતિવ્યાપ્તિવારણાયાસધારણેતિ । અભાવસ્મૃત્યસાધારણહેતુસંસ્કારેઽતિવ્યાપ્તિવારણાયાનુભવેતિ વિશેષણમ્ । ન ચાતીન્દ્રિયાભાવાનુમિતિસ્થલેઽપ્યનુપલબ્ધ્યૈવાભાવો ગૃહ્યતામ્ વિશેષાભાવાદિતિ વાચ્યમ્ । ધર્માધર્માદ્યનુપલબ્ધિસત્ત્વેઽપિ તદભાવાનિશ્ચયેન યોગ્યાનુપલબ્ધેરેવાભાવાગ્રાહકત્વાત્ ।

નનુ કેયં યોગ્યાનુપલબ્ધિઃ । કિં યોગ્યસ્ય પ્રતિયોગિનોઽનુપલબ્ધિઃ । ઉત યોગ્યેઽધિકરણે પ્રતિયોગિનોઽનુપલબ્ધિઃ । નાદ્યઃ સ્તમ્ભે પિશાચાદિભેદસ્યાપ્રત્યક્ષત્વાપત્તેઃ । નાન્ત્યઃ આત્મનિ ધર્માદ્ય - ભાવસ્યાપિ પ્રત્યક્ષત્વાપત્તેરિતિ ચેત્ ન " યોગ્યા ચાસાવનુપ - લબ્ધિશ્ચેતિ " કર્મધારયાશ્રયણાત્ । અનુપલબ્ધેર્યોગ્યતા ચ તર્કિતપ્રતિયોગિસત્ત્વપ્રસઞ્જિતપ્રતિયોગિકત્વમ્ । યસ્યાભાવો ગૃહ્યતે તસ્ય યઃ પ્રતિયોગી તસ્ય સત્ત્વેનાધિકરણે તર્કિતેન પ્રસઞ્જનયોગ્યમાપાદનયોગ્યં પ્રતિયોગ્યુપલબ્ધિસ્વરૂપં યસ્ય અનુપલમ્ભસ્ય તત્ત્વં તદનુપલબ્ધેર્યોગ્યત્વમિત્યર્થઃ । તથાહિ - સ્ફીતાલોકવતિ ભૂતલે યદિ ઘટઃ સ્યાત્ તદા ઘટોપલમ્ભઃ સ્યાદિત્યાપાદનસમ્ભવાત્ તાદૃશભૂતલે ઘટાભાવોઽનુપલબ્ધિગમ્યઃ । અન્ધકારે તુ તાદૃશાપાદનાસમ્ભવાન્નાનુપલબ્ધિગમ્યતા । અત એવસ્તમ્ભે તાદાત્મ્યેન પિશાચસત્ત્વે સ્તમ્ભવત્ પ્રત્યક્ષત્વાપત્ત્યા તદભાવોઽનુપલબ્ધિગમ્યઃ । આત્મનિ ધર્માદિસત્ત્વેઽપ્યસ્યાતીન્દ્રિયતયા નિરુક્તોપલમ્બાપાદનાસમ્ભવાત્ ન ધર્માદ્યભાવસ્યાનુપલબ્ધિગમ્યત્વમ્।

નનૂક્તરીત્યાઽધિકરણેન્દ્રિયસન્નિકર્ષસ્થલે અભાવસ્યાઉપલબ્ધિગમ્યત્વં ત્વદનુમતમ્ । તત્ર ક્લૃપ્તેન્દ્રિયમેવાભાવાકારવૃત્તાવપિ કરણમ્ ઇન્દ્રિયાન્વયવ્યતિરેકાનુવિધાનાદિતિ ચેત્ ન । તત્પ્રતિયોગ્યનુપલબ્ધે - રપ્યભાવગ્રહે હેતુત્વેન ક્લૃપ્તત્વેન કરણત્વમાત્રસ્ય કલ્પનાત્ । ઇન્દ્રિયસ્ય ચાભાવેન સમં સન્નિકર્ષાભાવેનાભાવગ્રહાહેતુત્વાત્ ઇન્દ્રિયાન્વયવ્યતિરેકયોરધિકરણજ્ઞાનાદ્યુપક્ષીણત્વેનાન્યથાસિદ્ધેઃ ।

નનુ " ભૂતલે ઘટો ન " ઇત્યાદ્યભાવાનુભવસ્થલે ભૂતલાંશે

પ્રત્યક્ષત્વમુભયસિદ્ધમિતિ તત્ર વૃત્તિનિર્ગમનસ્યાવશ્યકત્વેન
ભૂતલાવચ્છિન્નચૈતન્યવત્ તન્નિષ્ઠઘટાભાવાવચ્છિન્નચૈતન્યસ્યાપિ
પ્રમાત્રભિન્નતયા ઘટાભાવસ્ય પ્રત્યક્ષતૈવ સિદ્ધાન્તેऽપિ ઇતિ
ચેત્ સત્યમ્ અભાવપ્રતીતેઃ પ્રત્યક્ષત્વેऽપિ તત્કારણસ્યાનુપ -
લબ્ધેર્માનાન્તરત્વાત્ । ન હિ ફલીભૂતજ્ઞાનસ્ય પ્રત્ર્યક્ષત્વે
તત્કરણસ્ય પ્રત્યક્ષપ્રમાણતાનિયતત્વમસ્તિ । " દશમસ્ત્વમસિ"
ઇત્યાદિવાક્યજન્યજ્ઞાનસ્ય પ્રત્યક્ષત્વેऽપિ તત્કરણસ્ય
વાક્યસ્ય પ્રત્યક્ષપ્રમાણભિન્નપ્રમાણત્વાભ્યુપગમાત્ ।

ફલવૈજાત્યં વિના કથં પ્રમાણભેદ ઇતિ ચેત્ ન વૃત્તિવૈજાત્યમાત્રેણ
પ્રમાણવૈજાત્યોપપત્તેઃ । થથા ચ ઘટાદ્યભાવાકારવૃત્તિર્નેન્દ્રિયજન્યા
ઇન્દ્રિયસ્ય વિષયેણાસન્નિકર્ષાત્ કિન્તુ ઘટાદ્યનુપલબ્ધિરૂપ -
માનાન્તરજન્યેતિ ભવત્યનુપલબ્ધેર્માનાન્તરત્વમ્ ।

નનુ અનુપલબ્ધિરૂપમાનાન્તરપક્ષેऽભાવપ્રતીતેઃ પ્રત્યક્ષત્વે
ઘટવતિ ઘટાભાવભ્રમસ્યાપિ પ્રત્યક્ષત્વાપત્તૌ તત્રાપ્યનિર્વચનીય -
ઘટાભાવોऽભ્યુપગમ્યેત । ન ચેષ્ટાપત્તિઃ તસ્ય માયોપાદાનક -
ત્વેऽભાવત્વાનુપપત્તેઃ માયોપાદાનકત્વાભાવે માયાયાઃ
સફલકાર્યોપાદાનત્વાનુપપત્તિરિતિ ચેત્ ન । ઘટવતિ
ઘટાભાવભ્રમોન તત્કાલોત્પન્નઘટાભાવવિષયકઃ કિન્તુ
ભૂતલરૂપાદૌ વિદ્યમાનો લૌકિકો ઘટાભાવો ભૂતલે આરોપ્યતે
ઇત્યન્યથાખ્યાતિરેવ આરોપ્યસન્નિકર્ષસ્થલે સર્વત્રાન્યથાખ્યાતેરેવ
વ્યવસ્થાપનાત્ ।

અસ્તુ વા પ્રતિયોગિમતિ તદભાવભ્રમસ્થલે તદભાવસ્યાનિર્વચનીયત્વમ્
તથાપિ તદુપાદાનં માયૈવ । નહ્યુપાદાનોપાદેયયોરત્યન્તસાજાત્યમ્
તન્તુપટયોરપિ તન્તુત્વપટત્વાદિના વૈજાત્યાત્ યત્કિઞ્ચિત્સાજાત્યસ્ય
માયયા અનિર્વચનીયઘટાભાવસ્ય ચ મિથ્યાત્વધર્મસ્ય વિદ્યમાનત્વાત્ ।
અન્યથા વ્યાવહારિકં ઘટાભાવં પ્રતિ કથં માયોપાદાનમિતિ કુતો
નાશઙ્કથાઃ । ન ચ વિજાતીયયોરપ્યુપાદાનોપાદેયભાવે બ્રહ્મૈવ
જગદુપાદાનં સ્યાદિતિ વાચ્યમ્ પ્રપઞ્ચવિભ્રમાધિષ્ઠાનત્વરૂપસ્ય
તસ્યેષ્ટત્વાત્ પરિણામિત્વરૂપસ્યોપાદાનત્વસ્ય નિરવયવે
બ્રહ્મણ્યનુપપત્તેઃ । તથા ચ પ્રપઞ્ચસ્ય પરિણામ્યુપાદાનં માયા
ન બ્રહ્મ ઇતિ સિદ્ધાન્ત ઇત્યલમતિપ્રસઙ્ગેન ।

સ ચાભાવશ્ચતુર્વિધઃ - પ્રાગભાવઃ પ્રધ્વંસાભાવોऽત્યન્ત

અભાવોઽન્યોન્યાભાવશ્ચેતિ । તત્ર મૃત્પિણ્ડાદૌ કારણે કાર્યસ્ય ઘટાદેરુત્પત્તેઃ પૂર્વં યોઽભાવઃ સ પ્રાગભાવઃ । સ ચ ભવિષ્યતીતિ પ્રતીતિવિષયઃ । તત્રૈવ ઘટસ્ય મુદ્ગરપાતાનન્તરં યોઽભાવઃ સ પ્રધ્વંસાભાવઃ । ધ્વંસસ્યાપિ સ્વાધિકરણકપાલનાશે નાશ એવ । ન ચ ઘટોન્મજ્જનાપત્તિઃ ઘટધ્વંસધ્વંસસ્યાપિ ઘટપ્રતિયોગિક - ધ્વંસત્વાત્ । અન્યથા પ્રાગભાવધ્વંસાત્મકઘટસ્ય વિનાશે પ્રાગભાવોન્મજ્જનાપત્તિઃ । ન ચૈવમપિ યત્ર ધ્વંસાધિકરણં નિત્યં તત્ર કથં ધ્વંસનાશ ઇતિ વાચ્યમ્ । તાદૃશમધિકરણં યદિ ચૈતન્યવ્યતિરિક્તં તદા તસ્ય નિત્યત્વમસિદ્ધમ્ બ્રહ્મવ્યતિરિક્તસ્ય સર્વસ્ય બ્રહ્મજ્ઞાનનિવર્ત્યતાયા વક્ષ્યમાણત્વાત્ । યદિ ચ ધ્વંસાધિકરણં ચૈતન્યં તદાઽસિદ્ધિઃ આરોપિતપ્રતિયોગિક - ધ્વંસસ્યાધિષ્ઠાને પ્રતીયમાનસ્યાધિષ્ઠાનમાત્રત્વાત્ । તદુક્તમ્ - " અધિષ્ઠાનાવશેષો હિ નાશઃ કલ્પિતવસ્તુનઃ " ઇતિ એવં શુક્તિરૂપ્યવિનાશોઽપીદમવચ્છિન્નચૈતન્યમેવ ।

યત્રાધિકરણે યસ્ય કાલત્રયેઽપ્યભાવઃ સોઽત્યન્તાભાવઃ । યથા વાયૌરૂપાત્યન્તાભાવઃ । સોઽપિ વિયદાદિવત્ ધ્વંસપ્રતિયોગ્યેવ । " ઇદમિદં ન " ઇતિ પ્રતીતિવિષયોઽન્યોન્યાભાવઃ । અયમેવ વિભાગો ભેદઃ પૃથક્ત્વં ચેતિ વ્યવહ્રિયતે ભેદાતિરિક્તપૃથક્ત્વાદૌ પ્રમાણાભાવાત્ । અયં ચાન્યોન્યાભાવોઽધિકરણસ્ય સાદિત્વે સાદિઃ યથ ઘટે પટભેદઃ અધિકરણસ્યાનાદિત્વેઽનાદિરેવ યથા જીવે બ્રહ્મભેદઃ બ્રહ્મણિ વા જીવભેદઃ । દ્વિવિધોઽપિ ભેદો ધ્વંસપ્રતિયોગ્યેવ અવિદ્યાનિવૃત્તૌ તત્પરતન્ત્રાણાં નિવૃત્ત્યવશ્યમ્ભાવાત્ ।

પુનરપિ ભેદો દ્વિવિધઃ - સોપાધિકો નિરુપાધિકશ્ચેતિ । તત્રોપાધિ - સત્તાવ્યાપ્યસત્તાકત્વં સોપાધિકત્વમ્ । તચ્છૂન્યત્વં નિરુપાધિકત્વમ્ । તત્રાદ્યો તથા એકસ્યૈવાકાશસ્ય ઘટાદ્યુપાધિભેદેન ભેદઃ । યથા વા એકસ્ય સૂર્યસ્ય જલભાજનભેદેન ભેદઃ । તથા ચ બ્રહ્મણોઽન્તઃકરણ - ભેદાદ્ભેદઃ । નિરુપાધિકભેદો યથા ઘટે પટભેદઃ ।

ન ચ બ્રહ્મણ્યપિ પ્રપઞ્ચભેદાભ્યુપગમેઽદ્વૈતવિરોધઃ તાત્ત્વિક - ભેદાનભ્યુપગમેન વિયદાદિવદદ્વૈતાવ્યાઘાતકત્વાત્ । પ્રપઞ્ચસ્યાદ્વૈતે બ્રહ્મણિ કલ્પિતત્વાઙ્ગીકારાત્ ।તદુક્તં સુરેશ્વરાચાર્યૈઃ -

" અક્ષમા ભવતઃ કેયં સાધકત્વપ્રકલ્પને ।

કિં ન પશ્યસિ સંસારં તત્રૈવાજ્ઞાનકલ્પિતમ્ ॥"
ઇતિ । અત એવ વિવરણેઽવિદ્યાનુમાને પ્રાગભાવવ્યતિરિક્તત્વવિશેષણમ્
તત્ત્વપ્રદીપિકાયામવિદ્યાલક્ષણે ભાવત્વ-વિશેષણં ચ સઙ્ગચ્છતે ।

એવં ચતુર્વિધાનામભાવાનાં યોગ્યાનુપલબ્ધ્યા પ્રતીતિઃ ।
તત્રાનુપલબ્ધિર્માનાન્તરમ્ ।

એવમુક્તાનાં પ્રમાણાનાં પ્રામાણ્યં સ્વત એવોત્પદ્યતે જ્ઞાયતે ચ ।
તથા હિ સ્મૃત્યનુભવસાધારણં સંવાદિપ્રવૃત્ત્યનુકૂલં તદ્વતિ
તત્પ્રકારકજ્ઞાનત્વં પ્રામાણ્યમ્ । તચ્ચ જ્ઞાનસામાન્યસામગ્રીપ્રયોજ્યં
ન ત્વધિકં ગુણમપેક્ષતે પ્રમામાત્રેઽનુગતગુણાભાવાત્ । નાપિ
પ્રત્યક્ષપ્રમાયાં ભૂયોઽવયવેન્દ્રિયસન્નિકર્ષઃ રૂપાદિપ્રત્યક્ષે
આત્મપ્રત્યક્ષે ચ તદભાવાત્ સત્યપિ તસ્મિન્ " પીતઃ શઙ્ખઃ "
ઇતિ પ્રત્યક્ષસ્ય ભ્રમત્વાચ્ચ । અત એવ ન સલ્લિઙ્ગપરામર્ષાદિક -
મપ્યનુમિત્યાદિપ્રમાયાં ગુણઃ અસલ્લિઙ્ગપરામર્ષાદિસ્થલેઽપિ
વિષયાબાધેનાનુમિત્યાદેઃ પ્રમાત્વાત્ । ન ચૈવમપ્રમાપ પ્રમા સ્યાત્
જ્ઞાસામાન્યસામગ્ર્યા અવિશેષાદિતિ વાચ્યમ્ । દોષાભાવસ્યાપિ
હેતુત્વાઙ્ગીકારાત્ । ન ચૈવં પરતસ્ત્વમ્ આગન્તુકભાકારણાપેક્ષાયામેવ
પરતસ્ત્વાત્ ।

જ્ઞાયતે ચ પ્રામાણ્યં સ્વતઃ । સ્વતો ગ્રાહ્યત્વં ચ દોષાભાવે સતિ
યાવત્સ્વાશ્રયગ્રાહકસામગ્રીગ્રાહ્યત્વમ્ । સ્વાશ્રયો વૃત્તિજ્ઞાનમ્
તદ્ગ્રાહકં સાક્ષિજ્ઞાનમ્ । તેનાપિ વૃત્તિજ્ઞાને ગૃહ્યમાણે તદ્ગતં
પ્રામાણ્યમપિ ગૃહ્યતે । ન ચૈવં પ્રામાણ્યસંશયાનુપપત્તિઃ
તત્ર સંશયાનુરોધેન દોષસ્યાપિ સત્ત્વેન દોષાભાવઘટિત -
સ્વાશ્રયગ્રાહકાભાવેન તત્ર પ્રામાણ્યસ્યૈવાગ્રહાત્ । યદ્વા
યાવત્સ્વાશ્રયગ્રાહકગ્રાહ્યત્વયોગ્યત્વં સ્વતસ્ત્વમ્ । સંશયસ્થલે
પ્રામાણ્યસ્યોક્તયોગ્યતાસત્ત્વેઽપિ દોષવશેનાગ્રહાત્ ન સંશયાનુપપત્તિઃ ।

અપ્રામાણ્યન્તુ ન જ્ઞાનસામાન્યસામગ્રીપ્રયોજ્યમ્ પ્રમાયા -
મપ્યપ્રામાણ્યાપત્તેઃ કિન્તુ દોષપ્રયોજ્યમ્ । નાપ્યપ્રામાણ્યં
યાવત્સ્વાશ્રયગ્રાહકગ્રાહ્યમ્ અપ્રામાણ્યઘટકતદભાવવત્ત્વાદે -
ર્વૃત્તિજ્ઞાનાનુપનીતત્વેન સાક્ષિણાગ્રહીતુમશક્યત્વાત્ । કિન્તુ
વિસંવાદિપ્રવૃત્ત્યાદિકિઙ્ગકાનુમિત્યાદિવિષય ઇતિ પરત
એવાપ્રામાણ્યમુત્પદ્યતે જ્ઞાયતે ચ ।

ઇતિ વેદાન્તપરિભાષાયામનુપલબ્ધિપરિચ્છેદઃ ।

## ૭ પ્રામાણ્યમ્ ।

એવં નિરૂપિતાનાં પ્રમાણાનાં પ્રામાણ્યં દ્વિવિધમ્ - વ્યાવહારિકતત્ત્વાવેદકત્વં પારમાર્થિકતત્ત્વાવેદકત્વં ચેતિ । તત્ર બ્રહ્મસ્વરૂપાવગાહિપ્રમાણવ્યતિરિક્તાનાં સર્વપ્રમાણાનામાદ્યં પ્રામાણ્યમ્ તદ્વિષયાણાં વ્યવહારદશાયાં બાધાભાવાત્ । દ્વિતીયન્તુ જીવબ્રહ્મૈક્યપરાણાં " સદેવ સોમ્યેદમગ્ર આસીત્ " ઇત્યાદિનાં " તત્ત્વમસિ " ઇત્યન્તાનામ્ તદ્વિષયસ્ય જીવપરૈક્યસ્ય કાલત્રયાંબાધ્યત્વાત્ । તચ્ચૈક્યં ' તત્ત્વં ' - પદાર્થજ્ઞાનાધીન-જ્ઞાનમિતિ પ્રથમં ' તત્ ' - પદાર્થો લક્ષણપ્રમાણાભ્યાં નિરૂપ્યતે ।

તત્ર લક્ષણં દ્વિવિધમ્ - સ્વરૂપલક્ષણં તટસ્થલક્ષણં ચેતિ । તત્ર સ્વરૂપમેવ લક્ષણં સ્વરૂપલક્ષણમ્ । યથા સત્યાદિકં બ્રહ્મસ્વરૂપલક્ષણમ् " સત્યં જ્ઞાનમનન્તં બ્રહ્મ ," " આનન્દો બ્રહ્મેતિ વ્યજાનાત્ " ઇત્યાદિશ્રુતેઃ । નનુ સ્વસ્ય સ્વવૃત્તિત્વાભાવે કથં લક્ષણત્વમિતિ ચેત્ ન સ્વસ્યૈવ સ્વાપેક્ષયા ધર્મિધર્મ - ભાવલ્પનયા લક્ષ્યલક્ષણત્વસમ્ભવાત્ । તદુક્તમ્ - " આનન્દો વિષયાનુભવઓ નિત્યત્વં ચેતિ સન્તિ ધર્માઃ અપૃથક્ત્વેऽપિ ચૈતન્યાત્ પૃથગિવાવભાસન્તે " ઇતિ ।

તટસ્થલક્ષણં નામ યાવલ્લક્ષ્યકાલમનવસ્થિતત્વે સતિ યદ્વ્યાવર્તકં તદેવ । યથા ગન્ધવત્વં પૃથિવીલક્ષણમ્ મહાપ્રલયે પરમાણુષુ ઉત્પત્તિકાલે ઘટાદિષુ ચ ગન્ધાભાવાત્ । પ્રકૃતે ચ જગજ્જન્માદિકારણત્વમ્ । અત્ર ' જગત્ ' - પદેન કાર્યજાતં વિવક્ષિતમ્ । કારણત્વં ચ કર્તૃત્વમ્ અતોऽવિદ્યાદૌ નાતિવ્યાપ્તિઃ । કર્તૃત્વં ચ તત્તદુપાદાન - ગોચરાપરોક્ષજ્ઞાનચિકિર્ષાકૃતિમત્વમ્ । ઈશ્વરસ્ય તાવદુપાદાનગોચરા - પરોક્ષજ્ઞાનસદ્ભાવે - " યઃ સર્વજ્ઞઃ સર્વવિત્ યસ્ય જ્ઞાનમયં તપઃ । તસ્માદેતદ્બ્રહ્મ નામ રૂપમન્નં ચ જાયતે । " ઇત્યાદિશ્રુતિર્માનમ્ । તાદૃશચિકીર્ષાસદ્ભાવે ચ " સોऽકામયત બહુ સ્યાં પ્રજાયેય " ઇત્યાદિશ્રુતિર્માનમ્ । તાદૃશકૃતૌ ચ " તન્મનોऽકુરુત " ઇત્યાદિવાક્યમ્ ।

જ્ઞાનેચ્છાદ્યન્યતમગર્ભં લક્ષણત્રિતયં વિવક્ષિતમ્  અન્યથા વ્યર્થવિશેષણાપત્તેઃ । અત એવ જન્મસ્થિતિધ્વંસાનામન્યતમસ્યૈવ લક્ષણે પ્રવેશઃ । એવં ચ લક્ષણાનિ નવ સમ્પદ્યન્તે । બ્રહ્મણો જગજ્જન્માદિકરણત્વે ચ ' યતો વા ઇમાનિ ભૂતાનિ જાયન્તે યેન જાતાનિ જીવન્તિ  યત્ પ્રયન્ત્યભિસંવિશન્તિ " ઇત્યાદિશ્રુતિર્માનમ્ ।

યદ્વા નિખિલજગદુપાદાનત્વં બ્રહ્મણો લક્ષણમ્ । ઉપાદાનત્વં ચ જગદધ્યાસાધિષ્ઠાનત્વમ્  જગદાકારેણ પરિણમમાનમાયાધિષ્ઠાનત્વં વા । એતાદૃશમેવોપાદાનત્વમભિપ્રેત્ય " ઇદં સર્વં યદયમાત્મા " " સચ્ચ ત્યચ્ચાભવત્ " " બહુ સ્યાં પ્રજાયેય " ઇત્યાદિશ્રુતિષુ બ્રહ્મપ્રપઞ્ચયોસ્તાદાત્મ્યવ્યપદેશઃ । " ઘટઃ સન્ " " ઘટો ભાતિ " " ઘત ઇષ્ટઃ " ઇત્યાદિલૌકિકવ્યપદેશોઽપિ સચ્ચિદાનન્દરૂપ-બ્રહ્મૈક્યાધ્યાસાત્ ।

નન્વાનન્દાત્મકચિદધ્યાસાદ્ઘટાદેરિષ્ટત્વવ્યવહારે દુઃખસ્યાપિ તત્રાધ્યાસાત્ તસ્યાપીષ્ટત્વવ્યવહારાપત્તિરિતિ ચેત્  ન " આરોપે સતિ નિમિત્તાનુસરણમ્  ન તુ નિમિત્તમસ્તીત્યારોપઃ " ઇત્યભ્યુપગમેન દુઃખાદૌ સચ્ચિદંશાધ્યાસેઽપિ આનન્દાંશાધ્યાસાભાવાત્ । જગતિ નામરૂપાંશદ્વયવ્યવહારસ્તુ અવિદ્યાપરિણામાત્મકનામરૂપસમ્બન્ધાત્ । તદુક્તમ્ -

" અસ્તિ ભાતિ પ્રિયં રૂપં નામ ચેત્યંશપઞ્ચકમ્ ।
આદ્યં ત્રયં બ્રહ્મરૂપં જગદ્રૂપં તતો દ્વયમ્ ॥ " ઇતિ ॥

અથ જગતો જન્મક્રમો નિરૂપતે । તત્ર સર્ગાદ્યકાલે પરમેશ્વરઃ સૃજ્યમાનપ્રપઞ્ચવૈચિત્ર્યહેતુપ્રાણિકર્મસહકૃતોઽપરિમિતાનિરૂપિત - શક્તિવિશેષવિશિષ્ટમાયાસહિતઃ સન્ નામરૂપાત્મકનિખિલપ્રપઞ્ચં પ્રથં બુદ્ધાવાકલય્ય " ઇદં કરિષ્યામિ " ઇતિ સઙ્કલ્પયતિ " તદૈક્ષત બહુ સ્યાં પ્રજાયેય " " સોઽકામયત બહુ સ્યાં પ્રજાયેય " ઇત્યાદિ શ્રુતેઃ ।
તત આકાશાદીનિ પઞ્ચભૂતાન્યપઞ્ચીકૃતાનિ તન્માત્રપદપ્રતિપાદ્યાન્યુત્પદ્યન્તે ।
તત્રાકાશસ્ય શબ્દો ગુણઃ  વાયોસ્તુ શબ્દસ્પર્શૌ  તેજસસ્તુ શબ્દસ્પર્શરૂપાણિ  અપાં તુ શબ્દસ્પર્શરૂપરસાઃ  પૃથિવ્યાસ્તુ શબ્દસ્પર્શરૂપરસગન્ધાઃ ।
ન તુ શબ્દસ્યાકાશમાત્રગુણત્વં  વાય્વાદાવપિ તદુપલમ્ભાત્ । ન ચાસૌ ભ્રમઃ  બાધકાભાવાત્ ।

ઇમાનિ ભૂતાનિ ત્રિગુણમાયાકાર્યાણિ ત્રિગુણાનિ । ગુણાઃ સત્ત્વરજસ્તમાંસિ ।
એતૈશ્ચ સત્ત્વગુણોપેતૈઃ પઞ્ચભૂતૈર્વ્યસ્તૈર્યથાક્રમં શ્રોત્રત્વક્ચક્ષૂ -
રસનઘ્રાણાનિ પઞ્ચજ્ઞાનેન્દ્રિયાણિ જાયન્તે । એતૈરેવ સત્ત્વગુણોપેતૈઃ પઞ્ચ -
ભૂતૈર્મિલિતૈર્મનોબુદ્ધ્યાહઙ્કારચિત્તનિ જાયન્તે । શ્રોત્રાદીનાં પઞ્ચાનાં
ક્રમેણ દિગ્વાતાર્કવરુણાશ્વિનોધિષ્ટાતૃદેવતાઃ । મન
આદીનાં ચતુર્ણાં ક્રમેણ ચન્દ્રચતુર્મુખશઙ્કરાચ્યુતા અધિષ્ઠાતૃદેવતાઃ ।
એતૈરેવ રજોગુણોપેતૈઃ પઞ્ચભૂતૈર્યથાક્રમં વાક્પાણિપાદપાયૂપસ્થાખ્યાનિ
કર્મેન્દ્રિયાણિ જાયન્તે । તેષાં ચ ક્રમેણ
વહ્નીન્દ્રોપેન્દ્રમૃત્યુપ્રજાપતયોઽધિષ્ઠાતૃ -
દેવતાઃ । રજોગુણોપેતૈઃ પઞ્ચભૂતૈરેવ મિલિતૈઃ પઞ્ચ વાયવઃ પ્રાણાપનવ્યાનોદાન -
સમાનાખ્યા જાયન્તે । તત્ર પ્રાગ્ગમનવાન્ વાયુઃ પ્રાણો નાસાદિસ્થાનવર્તી ।
અર્વાગ્ગમનવાનપાનઃ પાય્વાદિસ્થાનવર્તી । વિષ્વગમનવાન્ વ્યાનઃ
અખિલશરીરવર્તી । ઊર્ધ્વગમનવાનુત્ક્રમણવાયુરુદાનઃ કણ્ઠસ્થાનવર્તી ।
અશિતપીતાન્નાદિસમીકરણકરઃ સમાનઃ નાભિસ્થાનવર્તી ।

તૈરેવ તમોગુણોપેતૈરપઞ્ચીકૃતભૂતૈઃ પઞ્ચીકૃતભૂતાનિ જાયન્તે ।
" તાસાં ત્રિવૃતં ત્રિવૃતમેકૈકાં
કરવાણિ " ઇતિ શ્રુતેઃ પઞ્ચીકરણોપલક્ષણર્થત્વાત્ ।
પઞ્ચીકરણપ્રકારશ્ચેત્થમ્ - આકાશમાદૌ દ્વિધા વિભજ્ય
તયોરેકં ભાગં પુનશ્ચતુર્ધા વિભજ્ય તેષાં ચતુર્ણામંશાનાં
વાય્વાદિષુ ચતુર્ષુ ભૂતેષુ સંયોજનમ્ । એવં વાયું દ્વિધા વિભજ્ય
તયોરેકં ભાગં પુનશ્ચતુર્ધા વિભજ્ય તેષાં ચતુર્ણામાંશાનામાકાશાદિષુ
સંયોજનમ્ । એવં તેજ આદીનામપિ । તદેવમેકૈકભૂતસ્યાર્ધં
સ્વાંશાત્મકમ્ અર્ધાન્તરં ચતુર્વિધભૂતમયમિતિ પૃથિવ્યાદિષુ
સ્વાંશાધિક્યાત્ પૃથિવ્યાદિવ્યવહારઃ । તદુક્તમ્ - " વૈશેષ્યાત્તુ
તદ્વાદસ્તદ્વાદઃ " ઇતિ ।

પૂર્વોક્તૈરપઞ્ચીકૃતભૂતૈર્લિઙ્ગશરીરં પરલોકયાત્રાનિર્વાહકં
મોક્ષપર્યન્તસ્થાયિ મનોબુદ્ધિભ્યામુપેતં જ્ઞાનેન્દ્રિયપઞ્ચક -
કર્મેન્દ્રિયપઞ્ચક - પ્રાણદિપઞ્ચકસંયુક્તં જાયતે । તદુક્તમ્ -
" પઞ્ચપ્રાણમનોબુદ્ધિદશેન્દ્રિયસમન્વિતમ્ ।
અપઞ્ચીકૃતભૂતોત્થં સૂક્ષ્માઙ્ગં ભોગસાધનમ્ ॥ " ઇતિ ।
તચ્ચ દ્વિવિધમ્ - પરમપરં ચ । પરં હિરણ્યગર્ભલિઙ્ગશરીરમ્

અપરમસ્મદાદિલિઙ્ગશરીરમ્ । તત્ર હિરણ્યગર્ભલિઙ્ગશરીરમ્ મહત્તત્ત્વમ્ અસ્મદાદિલિઙ્ગશરીરં ચાહઙ્કાર ઇત્યાખ્યાયતે ।

એવં તમોગુણયુક્તેભ્યઃ પઞ્ચીકૃતભૂતેભ્યો ભૂમ્યન્તરિક્ષસ્વર્મહ - ર્જનતપઃસત્યાત્મકસ્યોર્ધ્વલોકસપ્તકસ્ય અતલવિતલસુતલ- તલાતલરસાતલમહાતલપાતાલાખ્યસ્ય અધોલોકસપ્તકસ્ય બ્રહ્માણ્ડસ્ય જરાયુજાણ્ડજસ્વેદજોદ્ભિજ્જાખ્યચતુર્વિધસ્થૂલશરીરાણાં ચોત્પત્તિઃ । તત્ર જરાયુજાનિ જરાયુભ્યો જાતાનિ મનુષ્યપશ્વાદિશરીરાણિ । અણ્ડજાન્યણ્ડેભ્યોજાતાનિ પક્ષિપન્નગાદિશરીરાણિ । સ્વેદજાનિ સ્વેદાજ્જાતાનિ યૂકમશકાદિશરીરાણિ । ઉદ્ભિજ્જાનિ ભૂમિનુદ્ભિદ્ય જાતાનિ વૃક્ષાદીનિ । વૃક્ષાદીનામપિ પાપફલભોગાયતનત્વેન શરીરત્વમ્ ।

તત્ર પરમેશ્વરસ્ય પઞ્ચતન્માત્રાદ્યુત્પત્તૌ સપ્તદશાવયવોપેત - લિઙ્ગશરીરોત્પત્તૌ હિરણ્યગર્ભસ્થૂલશરીરોત્પત્તૌ ચ સાક્ષાત્ કર્તૃત્વમ્ ઇતરનિખિલપ્રપઞ્ચોત્પત્તૌ ચ હિરણ્યગર્ભાદિદ્વારા " હન્તાહમિમાસ્તિસ્રૌ દેવતા અનેન જીવેનાત્મનાનુપ્રવિશ્ય નામરૂપે વ્યાકરવાણિ " ઇતિ શ્રુતેઃ ।

હિરણ્યગર્ભો નામ મૂર્તિત્રયાદન્યઃ પ્રથમો જીવઃ ।

" સ વૈ શરીરી પ્રથમઃ સ વૈ પુરુષ ઉચ્યતે ।
આદિકર્તા સ ભૂતાનાં બ્રહ્માગ્રે સમવર્તત ॥"

" હિરણ્યગર્ભઃ સમવર્તતાગ્રે " ઇત્યાદિશ્રુતેઃ ।
એવં ભૂતભૌતિકસૃષ્ટિર્નિરૂપિતા ।

ઇદાનીં પ્રલયો નિરૂપ્યતે । પ્રલયો નામ ત્રૈલોક્યવિનાશઃ । સ ચ ચતુર્વિધઃ - નિત્યઃ પ્રાકૃતો નૈમિત્તિક આત્યન્તિકશ્ચેતિ । તત્ર નિત્યઃ પ્રલયઃ સુષુપ્તિઃ તસ્યાઃ સકલકાર્યપ્રલયરૂપત્વાત્ । ધર્માધર્મ - પૂર્વસંસ્કારાણાં ચ તદા કારણાત્મનાઽવસ્થાનમ્ । તેન સુપ્તોત્થિતસ્ય ન સુખદુઃખાદ્યનુપપત્તિઃ ન વા સ્મરણાનુપપત્તિઃ । ન ચ સુષુપ્તૌ અન્તઃકરણસ્ય વિનાશે તદધીનપ્રાણાદિક્રિયાનુપપત્તિઃ વસ્તુતઃ શ્વાસાદ્યભાવેઽપિ તદુપલબ્ધેઃ પુરુષાન્તરવિભ્રમમાત્રત્વાત્ સુપ્તશરીરોપલમ્ભવત્ । ન ચ એવં સુપ્તસ્ય પરેતાદવિશેષઃ સુપ્તસ્ય હિ લિઙ્ગશરીરં સંસ્કારાત્મનાઽત્રૈવ વર્તતે પરેતસ્ય તુ લોકાન્તરે ઇતિ વૈલક્ષણ્યાત્ ।

યદ્વા અન્તઃકરણસ્ય દ્વે શક્તિ - જ્ઞાનશક્તિઃ ક્રિયાશક્તિશ્ચેતિ ।
તત્ર જ્ઞાનશક્તિવિશિષ્ટાન્તઃકરણસ્ય સુષુપ્તઊ વિનાશઃ ન તુ
ક્રિયાશક્તિવિશિષ્ટસ્ય ઇતિ પ્રાણદ્યવસ્થાનમવિરુદ્ધમ્ । " યદા
સુપ્તઃ સ્વપ્નં ન કઞ્ચન પશ્યતિ અથાસ્મિન્ પ્રાણ એવૈકધા ભવતિ
અથૈનં વાક્ સર્વૈર્નામભિઃ સહાપ્યેતિ " " સતા સોમ્ય તદા સમ્પન્નો
ભવતિ સ્વમપીતો ભવતિ " ઇત્યાદિશ્રુતિરુક્તસુષુપ્તૌ માનમ્ ।
પ્રાકૃતપ્રલયસ્તુ કાર્યબ્રહ્મવિનાશનિમિત્તકઃ સકલકાર્યવિનાશઃ ।
યદા તુ પ્રાગેવોત્પન્નબ્રહ્મસાક્ષાત્કારસ્ય કાર્ય બ્રહ્મણો બ્રહ્માણ્ડાધિકાર -
લક્ષણપ્રારબ્ધકર્મસમાપ્તૌ વિદેહકૈવલ્યાત્મિકા પરા મુક્તિઃ તદા
તલ્લોકવાસિનામપ્યુત્પન્નબ્રહ્મસાક્ષાત્કારાણાં બ્રહ્મણા સહ વિદેહકૈવલ્યમ્ ।
" બ્રહ્મણા સહ તે સર્વે સમ્પ્રાપ્તે પ્રતિસઞ્ચરે ।
પરસ્યાન્તે કૃતાત્માનઃ પ્રવિશન્તિ પરં પદમ્ ॥ " ઇતિ સ્મૃતેઃ ।
એવં સ્વલોકવાસિભિઃ સહ કાર્યબ્રહ્મણિ મુચ્યમાને તદધિષ્ઠિતબ્રહ્માણ્ડ
તદન્તર્વર્તિનિખિલલોક તદન્તર્વર્તિસ્થાવરાદીનાં ભૌતિકાનાં
ભૂતાનાં ચ પ્રકૃતૌ માયાયાં લયઃ ન તુ બ્રહ્મણિ બાધરૂપવિનાશસ્યૈવ
બ્રહ્મનિષ્ઠત્વાત્ અતઃ પ્રાકૃત ઇત્યુચ્યતે ।
કાર્યબ્રહ્મણો દિવસાવસાનનિમિત્તકઃ ત્રૈલોક્યમાત્રપ્રલયઃ
નૈમિત્તિકપ્રલયઃ । બ્રહ્મદિવસશ્ચતુર્યુગસહસ્રપરિમિતકાલઃ
" ચતુર્યુગસહસ્રાણિ બ્રહ્મણો દિનમુચ્યતે " ઇત્યાદિવચનાત્ ।
પ્રલયકાલોઽપિ દિવસકાલપરિમિતઃ રાત્રિકાલસ્ય
દિવસકાલતુલ્યત્વાત્ ।
પ્રાકૃતપ્રલયે નૈમિત્તિકપ્રલયે ચ પુરાણવચનાનિ પ્રમાણાનિ ।
" દ્વિપરાર્ધે ત્વતિક્રાન્તે બ્રહ્મણહ્ પરમેષ્ઠિનઃ ।
તદા પ્રકૃતયઃ સપ્ત કલ્યન્તે પ્રલયાય હિ ॥
એષ પ્રાકૃતિકો રાજન્ પ્રલયો યત્ર લીયતે । "
ઇતિ વચનં પ્રાકૃતપ્રલયે માનમ્ ।
" એષ નૈમિત્તિકઃ પ્રોક્તઃ પ્રલયો યત્ર વિશ્વસૃક્ ।
શેતેઽનન્તાસને નિત્યમાત્મસાત્કૃત્ય ચાખિલમ્ । "
ઇતિ વચનં નૈમિત્તિકઃ પ્રલયે માનમ્ ।
તુરીયપ્રલયસ્તુ બ્રહ્મસાક્ષાત્કારનિમિત્તકઃ સર્વમોક્ષઃ ।
સ ચૈકજીવવાદે યુગપદે નાનાજીવવાદે તુ ક્રમેણ । " સર્વ

એકીભવન્તિ" ઇત્યાદિશ્રુતેઃ ।

તત્રાદ્યાસ્ત્રયોઽપિ લયાઃ કર્મોપરમનિમિત્તાઃ તુરીયસ્તુ જ્ઞાનોદ્યનિમિત્તો લયોઽજ્ઞાનેન સહૈવેતિ વિશેષઃ ।

એવં ચતુર્વિધપ્રલયો નિરૂપિતઃ । તસ્યદાનીં ક્રમો નિરૂપ્યતે । ભૂતાનાં ભૌતિકાનાં ચ ન કારણલયક્રમેણ લયઃ  કારણલયસમયે કાર્યાણામાશ્રયમન્તરેણાવસ્થાનાનુપપત્તેઃ  કિન્તુ સૃષ્ટિક્રમવિપરીતક્રમેણ । તત્તત્કાર્યનાશે તત્તજ્જનકાદૃષ્ટનાશસ્યૈવ પ્રયોજકતયા ઉપાદાનનાશસ્યાપ્રયોજકત્વાત્ । અન્યથા ન્યાયમતેઽપિ મહાપ્રલયે પૃથિવીપરમાણુગતરૂપરસાદેરવિનાશાપત્તેઃ । તથા ચ પૃથિવ્યા અપ્સુ  અપાં તેજસિ  તેજસો વાયૌ  વાયોરાકાશે  આકાશસ્ય જીવાહઙ્કારે  તસ્ય હિરણ્યગર્ભાહઙ્કારે  તસ્ય ચાવિદ્યાયામ્ - ઇત્યેવંરૂપ એવ પ્રલયઃ । તદુક્તં વિષ્ણુપુરાણે -

"જગત્પ્રતિષ્ઠા દેવર્ષે પૃથિવ્યપ્સુ પ્રલીયતે ।
તેજસ્યાપઃ પ્રલીયન્તે તેજો વાયૌ પ્રલીયતે ॥

વાયુશ્ચ લીયતે વ્યોમ્નિ તચ્ચાવ્યક્તે પ્રલીયતે ।
અવ્યક્તં પુરુષે બ્રહ્મનિષ્કલે સમ્પ્રલીયતે" ઇતિ ।

એવંવિધપ્રલયકારણત્વં 'તત્' - પદાર્થસ્ય બ્રહ્મણસ્તટસ્થલક્ષણમ્ ।

નનુ વેદાન્તૈર્બ્રહ્મણિ જગત્કારણત્વેન પ્રતિપાદ્યમાને સતિ સપ્રપઞ્ચં સ્યાત્  અન્યથા સૃષ્ટિવાક્યાનામપ્રામાણ્યાપત્તિરિતિ ચેત્  ન । ન હિ સૃષ્ટિવાક્યાનાં સૃષ્ટૌ તાત્પર્યમ્  કિન્તુ અદ્વયે બ્રહ્મણ્યેવ । તત્પ્રતિપત્તૌ કથં સૃષ્ટેરુપયોગઃ । ઇત્થમ્ - યદિ સૃષ્ટિમનુપન્યસ્ય પ્રપઞ્ચસ્ય વાયૌ પ્રતિષિદ્ધસ્ય રૂપસ્યેવ  બ્રહ્મણોઽન્યત્રાવસ્થાનશઙ્કાયાં ન નિર્વિચિકિત્સમદ્વિતીયત્વં પ્રતિપાદિતં સ્યાત્ । તતઃ સૃષ્ટિવાક્યાદ્બ્રહ્મોપાદેયત્વજ્ઞાને સતિ  ઉપાદાનં વિના કાર્યસ્યાન્યત્ર સદ્ભાવશઙ્કાયાં નિરસ્તાયાં "નેતિ નેતિ" ઇત્યાદિના બ્રહ્મણ્યપિ તસ્યાસત્ત્વોપપાદનેન પ્રપઞ્ચસ્ય તુચ્છત્વાવગમે નિરસ્તનિખિલદ્વૈતવિભ્રમમખણ્ડં સચ્ચિદાનન્દૈકરસં બ્રહ્મ સિદ્ધ્યતીતિ પરમ્પરયા સૃષ્ટિવાક્યાનામપિ અદ્વિતીયે બ્રહ્મણ્યેવ તાત્પર્યમ્ । ઉપાસનાપ્રકરણપઠિતસગુણબ્રહ્મવાક્યાનાં ચ ઉપાસનાવિધ્યપેક્ષિતગુણારોપમાત્રપરત્વમ્  ન ગુણપરત્વમ્ ।

નિર્ગુણપ્રકરણપઠિતાનાં સગુણવાક્યાનાન્તુ નિષેધવાક્યા -
પેક્ષિતનિષેધ્યસમર્પકત્વેન વિનિયોગ ઇતિ ન કિઞ્ચિદપિ
વાક્યમદ્વિતીયબ્રહ્મપ્રતિપાદનેન વિરુધ્યતે ।

તદેવં સ્વરૂપતટસ્થલક્ષણલક્ષિતં ' તત્ ' પદવાચ્યમીશ્વરચૈતન્યં
માયાપ્રતિબિમ્બરૂપમિતિ કેચિત્ । તેષામયમાશયઃ - જીવપરમેશ્વર -
સાધારણં ચૈતન્યમાત્રં બિમ્બમ્ તસ્યૈવ બિમ્બસ્યાવિદ્યાત્મિકાયાં
માયાયાં પ્રતિબિમ્બમીશ્વરચૈતન્યમ્ અન્તઃકરણેષુ પ્રતિબિમ્બં
જીવચૈતન્યમ્ " કાર્યોપાધિરયં જીવઃ કારણોપદિરીશ્વરઃ " ઇતિ
શ્રુતેઃ । એતન્મતે જલાશયગતશરાવજલગતસૂર્યપ્રતિબિમ્બયોરિવ
જીવપરમેશ્વરયોર્ભેદઃ । અવિદ્યાત્મકોપાધેર્વ્યાપકતયા
તદુપાધિકેશ્વરસ્યાપિ વ્યાપકત્વમ્ । અન્તઃકરણસ્ય પરિચ્છિન્નતયા
તદુપાધિકજીવસ્યાપિ પરિચ્છિન્નત્વમ્ ।

એતન્મતેઽવિદ્યાકૃતદોષા જીવ ઇવ પરમેશ્વરેઽપિ સ્યુઃ ઉપાધેઃ
પ્રતિબિમ્બપક્ષપાતિત્વાત્ ઇત્યસ્વરસાત્ બિમ્બાત્મકમીશ્વરચૈતન્યમિત્યપરે ।
તેષામયમાશયઃ - એકમેવ ચૈતન્યં બિમ્બત્વાક્રાન્તમીશ્વરચૈતન્યમ્
પ્રતિબિમ્બત્વાક્રાન્તં જીવચૈતન્યમ્ । બિમ્બપ્રતિબિમ્બકલ્પનોપાધિશ્ચૈક -
જીવવાદે અવિદ્યા અનેકજીવવાદે તુ અન્તઃકરણાન્યેવ । અવિદ્યાન્તઃ -
કરણરૂપોપાધિપ્રયુક્તો જીવપરભેદઃ । ઉપાધિકૃતદોષાશ્ચ પ્રતિબિમ્બે
જીવ એવ વર્તન્તે ન તુ બિમ્બે પરમેશ્વરે ઉપાધેઃ પ્રતિબિમ્બપક્ષપાતિત્વાત્ ।
એતન્મતે ચ ગગનસૂર્યસ્ય જલાદૌ ભાસમાનપ્રતિબિમ્બસૂર્યસ્યેવ
જીવપરયોર્ભેદઃ ।

નનુ ગ્રીવસ્થમુખસ્ય દર્પણપ્રદેશ ઇવ બિમ્બચૈતન્યસ્ય પરમેશ્વરસ્ય
જીવપ્રદેશેઽભાવાત્ તસ્ય સર્વાન્તર્યામિત્વં
ન સ્યાદિતિ ચેત્ , ન । સાભ્રનક્ષત્ર-
સ્યાકાશસ્ય જલાદૌ પ્રતિબિમ્બિતત્વે બિમ્બભૂતમહાકાશસ્યાપિ જલાદિપ્રદેશ-
સમ્બન્ધદર્શનેન પરિચ્છિન્નાબિમ્બસ્ય પ્રતિબિમ્બદેશાસમ્બન્ધિત્વેઽપ્ય-
પરિચ્છિન્નબ્રહ્મબિમ્બસ્ય પ્રતિબિમ્બદેશસમ્બન્ધાવિરોધાત્ ।

ન ચ રૂપહીનસ્ય બ્રહ્મણો ન પ્રતિબિમ્બસમ્ભવઃ, રૂપવત એવ
તથાત્વદર્શનાત્, ઇતિ વાચ્યમ્ ; નીરૂપસ્યાપિ રૂપસ્ય પ્રતિબિમ્બ-
દર્શનાત્ । ન ચ નીરૂપસ્ય દ્રવ્યસ્ય પ્રતિબિમ્બાભાવનિયમઃ,
આત્મનો દ્રવ્યત્વાભાવસ્ય ઉક્તત્વાત્ ।

" એકધા બહુધા ચૈવ દૃશ્યતે જલચન્દ્રવત્ "।

"યથા હ્યયં જ્યોતિરાત્મા વિવસ્વાનપો ભિન્ના બહુધૈકોઽનુગચ્છન્ "।
ઇત્યાદિવાક્યેન બ્રહ્મપ્રતિબિમ્બાભાવાનુમાનસ્ય બાધિતત્વાચ્ચ ।
તદેવં "તત્" - પદાર્થો નિરૂપિતઃ ।

ઇદાનીં "ત્વમ્"-પદાર્થો નિરૂપ્યતે । એકજીવવાદેઽવિદ્યાપ્રતિબિમ્બો જીવઃ , અનેકજીવવાદે તુ અન્તઃકરણપ્રતિબિમ્બઃ । સ ચ જાગ્રત્સ્વપ્ન-સુષુપ્તિરૂપાવસ્થાત્રયવાન્ । તત્ર જાગ્રદ્દશા નામ ઇન્દ્રિયજન્યજ્ઞાનાવસ્થા, અવસ્થાન્તરે ઇન્દ્રિયાભાવાત્ નાતિવ્યાપ્તિઃ । ઇન્દ્રિયજન્યજ્ઞાનં ચ અન્તઃકરણવૃત્તિઃ , સ્વરૂપજ્ઞાનસ્યાનાદિત્વાત્ ।

સા ચાન્તઃકરણવૃત્તિરાવરણાભિભવાર્થા ઇત્યેકં મતમ્ । તથા હિ- અવિદ્યોપહિતચૈતન્યસ્ય જીવત્વપક્ષે ઘટાદ્યધિષ્ઠાન-ચૈતન્યસ્ય જીવરૂપતયા જીવસ્ય સર્વદા ઘટાદિભાનપ્રસક્તૌ ઘટાદ્યવચ્છિન્નચૈતન્યાવરકમજ્ઞાનં મૂલાવિદ્યાપરતન્ત્રમવસ્થ-પદવાચ્યમભ્યુપગન્તવ્યમ્ । એવં સતિ ન સર્વદા ઘટાદેર્ભાનપ્રસઙ્ગઃ, અનાવૃતચૈતન્યસમ્બન્ધસ્યૈવ ભાનપ્રયોજકત્વાત્ । તસ્ય ચાવરણસ્ય સદાતનત્વે કદાચિદપિ ઘટભાનં ન સ્યાદિતિ તદ્ભઙ્ગે વક્તવ્યે, તદ્ભઙ્ગજનકં ન ચૈતન્યમાત્રમ્ , તદ્ભાસકસ્ય તદનિવર્તકત્વાત્ , નાપિ વૃત્ત્યુપહિતં ચૈતન્યમ્ , પરોક્ષસ્થલેઽપિ તન્નિવૃત્ત્યાપત્તેરિતિ પરોક્ષવ્યાવૃત્તવૃત્તિવિશેષસ્ય, તદુપહિતચૈતન્યસ્ય વા, આવરણભઞ્જકત્વમ્ , ઇતિ આવરણાભિભવાર્થા વૃત્તિરુચ્યતે ।

સમ્બન્ધાર્થા વૃત્તિરિત્યપરં મતમ્ । તત્રાવિદ્યોપાધિકોઽપરિચ્છિન્નો જીવઃ । સ ચ ઘટાદિપ્રદેશે વિદ્યમાનોઽપિ ઘટાદ્યાકારાપરોક્ષવૃત્તિવિરહદશાયાં ન ઘટાદિકમવભાસયતિ, ઘટાદીના સમં સમ્બન્ધાભાવાત્ , તત્તદાકારવૃત્તિદશાયાં તુ ભાસયતિ, તદા સમ્બન્ધસત્ત્વાત્ ।

નનુ અવિદ્યોપાધિકસ્યાપરિચ્છિન્નસ્ય જીવસ્ય સ્વત એવ સમસ્તવસ્તુસમ્બધસ્ય વૃત્તિવિરહદશાયાં સમ્બન્ધાભાવાભિ-ધાનમસઙ્ગતમ્ , અસઙ્ગત્વદૃષ્ટ્યા સમ્બન્ધાભાવાભિધાને ચ વૃત્ત્યનન્તરમપિ સમ્બન્ધો ન સ્યાત્ , ઇતિ ચેત્ , ઉચ્યતે ।
ન હિ વૃત્તિવિરહદશાયાં જીવસ્ય ઘટાદિના સહ સમ્બન્ધસામાન્યં નિષેધામઃ । કિન્તર્હિ ? ઘટાદિભાનપ્રયોજકં સમ્બન્ધવિશેષમ્ ।
સ ચ સમ્બન્ધવિશેષો વિષયસ્ય જીવચૈતન્યસ્ય ચ વ્યઙ્ગ્ય-વ્યઞ્જકતાલક્ષણઃ કાદાચિત્કસ્તત્તદાકારવૃત્તિનિબન્ધનઃ ।

તથા હિ - તૈજસમન્તઃકરણં સ્વચ્છદ્રવ્યત્વાત્ સ્વત એવ
જીવચૈતન્યાભિવ્યઞ્જનસમર્થમ્ । ઘટાદિકસ્તુ ન તથા, અસ્વચ્છ-
દ્રવ્યત્વાત્ । સ્વાકારવૃત્તિસંયોગદશાયાન્તુ વૃત્ત્યભિભૂતજાડ્ય-
ધર્મકતયા વૃત્ત્યુત્પાદિતચૈતન્યાભિવ્યઞ્જનયોગ્યતશ્રયતયા ચ
વૃત્ત્યુદયાનન્તરં ચૈતન્યમભિવ્યનક્તિ । તદુક્તં વિવરણે "અન્તઃકરણં
હિ સ્વસ્મિન્નિવ સ્વસંસર્ગિણ્યપિ ઘટાદૌ ચૈતન્યાભિવ્યક્તિયોગ્યતામાપાદયતિ"
ઇતિ । દૃષ્ટં ચાસ્વચ્છદ્રવ્યસ્યપિ સ્વચ્છદ્રવ્યસમ્બન્ધદશાયાં
પ્રતિબિમ્બગ્રાહિત્વમ્ । તથા કુડ્યાદેર્જલાદિસંયોગદશાયાં મુખાદિ-
પ્રતિબિમ્બગ્રાહિતા । ઘટાદેરભિવ્યઞ્જાત્વં ચ તત્પ્રતિબિમ્બગ્રાહિત્વમ્ ,
ચૈતન્યસ્યાભિવ્યક્તત્વં ચ તત્ર પ્રતિબિમ્બિતત્વમ્ ।

એવંવિધાભિવ્યઞ્જકત્વસિદ્ધ્યર્થમેવવૃત્તેરપરોક્ષસ્થલે
બહિર્નિર્ગમનાઙ્ગીકાર । પરોક્ષસ્થલે તુ વહ્ન્યાદેર્વૃત્તિસંસર્ગાભાવેન
ચૈતન્યાનભિવ્યઞ્જકતયા નાપરોક્ષત્વમ્ । એતન્મતે ચ
વિષયાણામપરોક્ષત્વં ચૈતન્યાભિવ્યઞ્જકત્વમિતિ દ્રષ્ટવ્યમ્ ।
એવં જીવસ્યાપરિચ્છિન્નત્વેઽપિ વૃત્તેઃ સમ્બન્ધાર્થત્વં નિરૂપિતમ્ ।

ઇદાનીં પરિચ્છિન્નત્વપક્ષે સમ્બધાર્થત્વં નિરુપ્યતે । તથા હિ -
અન્તઃકરણોપાધિકો જીવઃ । તસ્ય ન ઘટાદ્યુપાદાનતા, ઘટાદિદેશસમ્બન્ધાત્ ।
કિન્તુ બ્રહ્મૈવ ઘટાદ્યુપાદાનમ્ , તસ્ય માયોપહિતસ્ય સકલઘટાદ્યન્વયિત્વાત્ ।
અત એવ બ્રહ્મણઃ સર્વજ્ઞ્'નતા । તથા ચ જીવસ્ય ઘટાદ્યધિષ્ઠાનબ્રહ્મચૈતન્યા-
ભેદમન્તરેણ ઘટાદ્યવભાસાસમ્ભવે પ્રાપ્તે ,
તદવભાસાય ઘટાદ્યધિષ્ઠાનબ્રહ્મ-
ચૈતન્યાભેદસિદ્ધ્યર્થં ઘટાદ્યાકારવૃત્તિરિષ્યતે ।
નનુ વૃત્ત્યાપિ કથં પ્રમાતૃચૈતન્યવિષયચૈતન્યયોરભેદઃ
સમ્પાદ્યતે, ઘટાનઃકરણરૂપોપાધિભેદેન તદવચ્છિન્નચૈતન્યયો -
રભેદાસમ્ભવાત્ , ઇતિ ચેત્ , ને । વૃત્તેર્બહિર્દેશનિર્ગમનાઙ્ગીકારેણ
વૃત્ત્યન્તઃકરણવિષયાણામેકદેશસ્થત્વેન તદુપધેયભેદાભાવસ્ય
ઉક્તત્વાત્ । એવમપરોક્ષસ્તહલે વૃત્તેર્મતભેદેન વિનિયોગ ઉપપાદિતઃ ।

ઇન્દ્રિયાજન્યવિષયગોચરાપરોક્ષાન્તઃકરણવૃત્ત્યવસ્થા સ્વપ્નાવસ્થા ।
જાગ્રદવસ્થાવ્યાવૃત્ત્યર્થમ્ "ઇન્દ્રિયાજન્યે" તિ । અવિદ્યાવૃત્તિમત્યાં
સુષુપ્તાવતિવ્યાપ્તિવારણાય "અન્તઃકરણે" તિ । સુષુપ્તિર્નામ અવિદ્યા -
ગોચરાવિદ્યાવૃત્ત્યવસ્થા । જાગ્રત્સ્વપ્નયોરવિદ્યાકારવૃત્તેરન્તઃકરણવૃત્તિત્વાન્ન

તત્રાતિવ્યાપ્તિઃ । અત્ર કેચિન્મરણભૂર્છયોરવસ્થાન્તરત્વમાહુઃ, અપરે તુ સુષુપ્તાવેવ તયોરન્તર્ભાવમાહુઃ । તત્ર તયોરવસ્થાત્રયાન્તર્ભાવબહિર્ભાવયોઃ " ત્વં " - પદાર્થનિરૂપણે ઉપયોગાભાવાત્ ન તત્ર પ્રયત્યતે ।

તસ્ય માયોપાધ્યપેક્ષયા એકત્વમ્ , અન્તઃકરણોપાધ્યપેક્ષયા ચ નાનાત્વં વ્યવહ્રિયતે । એતેન જીવસ્યાણુત્વં પ્રત્યુક્તમ્ , " બુદ્ધેર્ગુણેન ચૈવં હ્યારાગ્રમાત્રો હ્યવરોઽપિ દૃષ્ટઃ । " ઇત્યાદૌ જીવસ્ય " બુદ્ધિ " - શબ્દવાચ્યાન્તઃકરણપરિણામોપાધિકસ્ય પરમાણુત્વશ્રવણાત્ ।

સ ચ જીવઃ સ્વયંપ્રકાશઃ , સ્વપ્નાવસ્થામધિકૃત્ય " અત્રાયં પુરુષઃ સ્વયં જ્યોતિઃ " ઇતિ શ્રુતેઃ । અનુભવરૂપશ્ચ , " પ્રજ્ઞાનઘન એવ " ઇત્યાદિશ્રુતેઃ । " અનુભવામિ " ઇતિ વ્યવહારસ્તુ વૃત્તિ પ્રતિબિમ્બિત-ચૈતન્યમાદાય ઉપપદ્યતે ।

એવં " ત્વં " - પદાર્થો નિરૂપિતઃ ।

અધુના ' તત્ - ત્વમ્ " - પદાર્થયોરૈક્યં મહાવાક્યપ્રતિપાદ્ય - મભિધીયતે । નનુ " નાહમીશ્વરઃ " ઇત્યાદિપ્રત્યક્ષેણ , કિઞ્ચિજ્જ્ઞત્વસર્વજ્ઞત્વાદિવિરુદ્ધધર્માશ્રયત્વાદિલિઙ્ગેન , " દ્વા સુપર્ણા " ઇત્યાદિશ્રુત્યા - " દ્વાવિમૌ પુરુષૌ લોકે ક્ષરશ્ચાક્ષર એવ ચ । ક્ષરઃ સર્વાણિ ભૂતાનિ કૂટસ્થોઽક્ષર ઉચ્યતે ॥ " ઇત્યાદિસ્મૃત્યા ચ જીવપરભેદસ્યાવગતત્વેન " તત્ત્વમસ્યા " - દિવાક્યમ્ " આદિત્યો યૂપઃ , " " યજમાનઃ પ્રસ્તરઃ " ઇત્યાદિવાક્યવદુપચરિતાર્થમેવ, ઇતિ ચેત્ , ન । ભેદપ્રત્યક્ષસ્ય સમ્ભાવિતકરણદોષસ્યાસમ્ભાવિતદોષવેદજન્યજ્ઞાનેન બાધ્યમાનત્વાત્ । અન્યથા ચન્દ્રગતાધિકપરિમાણગ્રાહિજ્યોતિઃ - શાસ્ત્રસ્ય ચન્દ્રપ્રાદેશગ્રાહિપ્રત્યક્ષેણ બાધાપત્તેઃ । પાકરક્તે ઘટે " રક્તોઽયમ્ , ન શ્યામઃ " ઇતિવત્ " સવિશેષણે હિ " ઇતિ ન્યાયેન જીવપરભેદગ્રાહિપ્રત્યક્ષસ્ય વિશેષણીભૂતધર્મ - ભેદવિષયત્વાચ્ચ । અત એવ નાનુમાનમપિ પ્રમાણમ્ , આગમવિરોધાત્ , મેરુપાષાણમયત્વાનુમાનવત્ ।

નાપ્યાગમાન્તરવિરોધઃ । તત્પરાતત્પરવાક્યયોસ્તત્પરવાક્યસ્ય બલવત્વેન લોકસિદ્ધભેદાનુવાદિ - " દ્વા સુપર્ણૌ " ત્યાદિ -

વાક્યાપેક્ષયા ઉપક્રમોપસંહારાદ્યવગતાદ્વૈતતાત્પર્યવિશિષ્ટસ્ય
" તત્ત્વમસ્યા " દિવાક્યસ્ય પ્રબલત્વાત્ । ન ચ જીવપરૈક્યે
વિરુદ્ધધર્માશ્રયત્વાનુપપત્તિઃ , શીતસ્યૈવ જલસ્યૌપાધિકૌષ્ણ્યાશ્રયત્વવત્
સ્વભાવતો નિર્ગુણસ્યૈવ જીવસ્યાન્તઃકરણાદ્યુપાધિક -
કર્તૃત્વાદ્યાશ્રયત્વપ્રતિભાસોપપત્તેઃ । યદિ ચ જલાદાવૌષ્ણ્યમારોપિતમ્ ,
તદા પ્રકૃતેઽપિ તુલ્યમ્ । ન ચ સિદ્ધાન્તે કર્તૃત્વસ્ય ક્વચિદપ્યભાવા -
દારોપ્યપ્રમાહિતસંસ્કારાભાવે કથમારોપઃ , ઇતિ વાચ્યમ્ ,
લાઘવેનારોપ્યવિષયકસંકારત્વેનૈવ તસ્ય હેતુત્વાત્ । ન ચ
પ્રાથમિકારોપે કા ગતિઃ , કર્તૃત્વાદ્યધ્યાસપ્રવાહસ્યાનાદિત્વાત્ ।

તત્ર ' તત્ત્વમ્ ' - પદવાચ્યયોર્વિશિષ્ટયોરૈક્યાયોગેઽપિ
લક્ષ્યસ્વરૂપયોરૈક્યમુપપાદિતમેવ । અત એવ તત્પ્રતિપાદક -
" તત્ત્વમસ્યા " દિવાક્યાનામખણ્ડાર્થત્વમ્ , " સોઽયમ્ "
ઇત્યાદિવાક્યવત્ । ન ચ કાર્યપરાણામેવ પ્રામાણ્યમ્ , " ચૈત્ર ,
પુત્રસ્તે જાતઃ " ઇત્યાદૌ સિદ્ધેઽપિ સઙ્ગતિગ્રહાત્ ।

એવં સર્વપ્રમાણાવિરુદ્ધં શ્રુતિસ્મૃતીતિહાસપુરાણપ્રતિપાદ્યં
જીવપરૈક્યં વેદાન્તશાસ્ત્રસ્ય વિષય ઇતિ સિદ્ધમ્ ।

ઇતિ વેદાન્તપરિભાષાયાં વિષયપરિચ્છેદઃ ।

---

## ૮ પ્રયોજનમ્ ।

ઇદાનીં પ્રયોજનં નિરૂપ્યતે । યદવગતં સત્ સ્વવૃત્તિતયા ઇષ્યતે
તત્પ્રયોજનમ્ । તચ્ચ દ્વિવિધમ્ - મુખ્યં ગૌણં ચેતિ । તત્ર
સુખદુઃખાભાવૌ મુખ્યે પ્રયોજને , તદન્યતરસાધનં ગૌણં પ્રયોજનમ્ ।
સુખં ચ દ્વિવિધમ્ - સાતિશયં નિતતિશયં ચ । તત્ર સાતિશયં સુખં
વિષયાનુષઙ્ગજનિતાન્તઃકરણવૃત્તિતારતમ્યકૃતાનન્દલેશાવિર્ભાવવિશેષઃ ,
" એતસ્યૈવાનન્દસ્યાન્યાનિ ભૂતાનિ માત્રામુપજીવન્તિ " ઇત્યાદિ શ્રુતેઃ ।
નિરતિશયં સુખં ચ બ્રહ્મૈવ , " આનન્દો બ્રહ્મેતિ વ્યજાનાત્ ,
" વિજ્ઞાનમાનન્દં બ્રહ્મ " ઇત્યાદિ શ્રુતેઃ ।

આનન્દાત્મકબ્રહ્માવાપ્તિશ્ચ મોક્ષઃ , શોકનિવૃત્તિશ્ચ ,
" બ્રહ્મ વેદ બ્રહ્મૈવ ભવતિ , " " તરતિ શોકમાત્મવિત્ "
ઇત્યાદિ શ્રુતેઃ । ન તુ લોકાન્તરાવાપ્તિઃ , તજ્જન્યવૈષયિકાનન્દો
વા મોક્ષઃ , તસ્ય કૃતકત્વેનાનિત્યત્વે મુક્તસ્ય પુનરાવૃત્ત્યાપત્તેઃ ।

નનુ ત્વન્મતેઽપ્યાનન્દાવાપ્તેરનર્થનિવૃત્તેશ્ચ સાદિત્વે તુલ્યો દોષઃ , અનાદિત્વે મોક્ષમુદ્દિશ્ય શ્રવણાદૌ પ્રવૃત્ત્યનુપપત્તિરિતિ ચેત્ , ન , સિદ્ધસ્યૈવ બ્રહ્મસ્વરૂપસ્ય મોક્ષસ્યાસિદ્ધત્વભ્રમેણ તત્સાધને પ્રવૃત્ત્યુપપત્તેઃ । અનર્થનિવૃત્તિરપ્યધિષ્ઠાનભૂતબ્રહ્મ - સ્વરૂપતયા સિદ્ધૈવ । લોકેઽપિ પ્રાપ્તપ્રાપ્તિ - પરિહૃતપરિહારયોઃ પ્રયોજનત્વં દૃષ્ટમેવ । યથા હસ્તગત્વિસ્મૃતસુવર્ણાદૌ " તવ હસ્તે સુવર્ણમ્ " ઇત્યાપ્તોપદેશાદપ્રાપ્તમિવ પ્રાપ્નોતિ । યથા વા વલયિતચરણાયાં સ્રજિ સર્પત્વભ્રમવતઃ " નાયં સર્પઃ " ઇત્યાપ્તવાક્યાત્ પરિહૃતસ્યૈવ સર્પસ્ય પરિહારઃ । એવં પ્રાપ્તસ્યાપ્યાનન્દસ્ય પ્રાપ્તિઃ , પરિહૃતસ્યાપ્યનર્થસ્ય નિવૃત્તિર્મોક્ષઃ પ્રયોજનં ચ ।

સ ચ જ્ઞાનૈકસાધ્યઃ , " તમેવ વિદિત્વાઽતિમૃત્યુમેતિ , નાન્યઃ પન્થા વિદ્યતેઽયનાય " ઇતિ શ્રુતેઃ , અજ્ઞાનનિવૃત્તેઃ જ્ઞાનૈકસાધ્યત્વ - નિયમાચ્ચ । તચ્ચ જ્ઞાનં બ્રહ્માત્મૈક્યગોચરમ્ , " અભયં વૈ જનક પ્રાપ્તોઽસિ , " " તદાત્માનમેવાવેત્ - અહં બ્રહ્માસ્મિ " ઇત્યાદિ શ્રુતેઃ , " તત્ત્વમસ્યાદિવાક્યોત્થં જ્ઞાનં મોક્ષસ્ય સાધનમ્ " ઇતિ નારદીયવચનાચ્ચ ।

તચ્ચ જ્ઞાનમપરોક્ષરૂપમ્ , પરોક્ષત્વેઽપરોક્ષભ્રમનિવર્તક - ત્વાનુપપત્તેઃ । તચ્ચાપરોક્ષજ્ઞાનં " તત્ત્વમસ્યા " દિવાક્યાદિતિ કેચિત્ , મનનનિદિધ્યાસનસંસ્કૃતાન્તઃકરણાદેવેત્યેપરે ।

તત્ર પૂર્વાચાર્યાણામાશયઃ - સંવિદાપરોક્ષ્યં ન કરણવિશેષોત્પત્તિ - નિબન્ધનમ્ , કિન્તુ પ્રમેયવિશેષનિબન્ધનમ્ ઇત્યુપાદિતમ્ । તથા ચ બ્રહ્મણઃ પ્રમાતૃજીવાભિન્નતયા તદ્ગોચરં શબ્દજન્યમપિ જ્ઞાનમપરોક્ષમ્ । અત એવ પ્રતર્દનાધિકરણે પ્રતર્દનં પ્રતિ " પ્રાણોઽસ્મિ પ્રજ્ઞાત્મા , તં મામાયુરમૃતમુપાસ્વ " ઇતિ ઇન્દ્રપ્રોક્તવાક્યે ' પ્રાણ ' - શબ્દસ્ય બ્રહ્મપરત્વે નિશ્ચિતે સતિ " મામુપાસ્વ " ઇત્યશચ્છાબ્દાનુપપત્તિમાશઙ્ક્ય તદુત્તરત્વેન પ્રવૃત્તે " શાસ્ત્રદૃષ્ટ્યા તૂપદેશો વામદેવવત્ " ઇત્યત્ર સૂત્રે શાસ્ત્રીયા દૃષ્ટિઃ શાસ્ત્રદૃષ્ટિઃ , " તત્ત્વમસ્યા " દિવાક્યજન્યમ્ " અહં બ્રહ્મ " ઇતિ જ્ઞાનં ' શાસ્ત્રદૃષ્ટિ ' - શબ્દેનોક્તમિતિ ।

અન્યેષાં ત્વેવમાશયઃ - કરણવિશેષનિબન્ધનમેવજ્ઞાનાનાં
પ્રત્યક્ષત્વમ્ , ન વિષયવિશેષનિબન્ધનમ્ , એકસ્મિન્નેવ સૂક્ષ્મવસ્તુનિ
પટુકરણાપટુકરણયોઃ પ્રત્યક્ષત્વાપ્રત્યક્ષત્વવ્યવહારદર્શનાત્ ।
તથ ચ સંવિત્સાક્ષાત્ત્વે ઇન્દ્રિયજન્યત્વસ્યૈવ પ્રયોજકતયા ન
શબ્દજન્યજ્ઞાનસ્યાપરોક્ષત્વમ્ । બ્રહ્મસાક્ષાત્કારેઽપિ મનન -
નિદિધ્યાસનસંસ્કૃતં મન એવ કરણમ્ , " મનસૈવાનુદ્રષ્ટવ્યમ્ "
ઇત્યાદિશ્રુતેઃ । મનોઽગમ્યત્વશ્રુતિશ્ચાસંસ્કૃતમનોવિષયા ।
ન ચૈવં બ્રહ્મણ ઔપનિષદત્વાનુપપત્તિઃ , અસ્મદુક્તમનસો
વેદજન્યજ્ઞાનાનન્તરમેવ પ્રવૃત્તતયા વેદોપજીવિત્વાત્ ;
વેદાનુપજીવિમાનાન્તરગમ્યત્વસ્યૈવ વિરોધિત્વાત્ ।
' શાસ્ત્રદૃષ્ટિ ' - સૂત્રમપિ બ્રહ્મવિષયકમાનસપ્રત્યક્ષસ્ય
શાસ્ત્ર[રયોજ્યત્વાદુપપદ્યતે । તદુક્તમ્ -

" ' અપિ સંરાધને ' સૂત્રાત્ શાસ્ત્રાર્થ ધ્યાનજા પ્રમા ।
શાસ્ત્રદૃષ્ટિર્મતા , તાન્તુ વેત્તિ વાચસ્પતિઃ પરમ્ ॥ "

તચ્ચ જ્ઞાનં પાપક્ષયાત્ , સ ચ કર્માનુષ્ઠાનાદિતિ
પરમ્પરયા
કર્મણાં વિનિયોગઃ । અત એવ " તમેતં વેદાનુવચનેન
બ્રાહ્મણા
વિવિદિષન્તિ યજ્ઞેન દાનેન તપસાઽનાશકેન " ઇત્યાદિ
શ્રુતિઃ ,
" કષાયે કર્મભિઃ પક્વે તતો જ્ઞાનં પ્રવર્તતે " ઇત્યાદિ
સ્મૃતિશ્ચ સઙ્ગચ્છતે ।

એવં શ્રવણમનનનિદિધ્યાસનાન્યપિ જ્ઞાનસાધનાનિ ,
મૈત્રેયીબ્રાહ્મણે " આત્મા વા અરે દ્રષ્ટવ્યઃ " ઇતિ
દર્શનમનૂદ્ય
તત્સાધનત્વેન " શ્રોતવ્યો મન્તવ્યો નિદિધ્યાસિતવ્યઃ " ઇતિ
શ્રવણમનનનિદિધ્યાસનાનાં વિધાનાત્ । શ્રવણં નામ
વેદાન્તાનામદ્વિતીયે બ્રહ્મણિ ત્તત્પર્યાવધારણાનુકૂલા
માનસી
ક્રિયા । મનનં નામ શબ્દાવધારિતેઽર્થે
માનાન્તરવિરોધશઙ્કાયાં

તન્નિરાકરણાનુકૂલતર્કાત્મકજ્ઞાનજનકો માનસો વ્યાપારઃ ।
નિદિધ્યાસનં નામ અનાદિદુર્વાસનયા વિષયેષ્વાકૃષ્યમાણસ્ય
ચિત્તસ્ય વિષયેભ્યોઽપકૃષ્ય આત્મવિષયકસ્થૈર્યાનુકૂલો
માનસો વ્યાપારઃ ।

તત્ર નિદિધ્યાસનં બ્રહ્મસાક્ષાત્કારે સાક્ષાત્
કારણમ્ , " તે
ધ્યાનયોગાનુગતા અપશ્યન્ , દેવાત્મશક્તિં
સ્વગુણૈર્નિગૂઢામ્ "
ઇત્યાદિ શ્રુતેઃ । નિદિધ્યાસને ચ મનનં હેતુઃ ,
અકૃતમનનસ્યાર્થ -
દાર્ઢ્યાભાવેન તદ્વિષયકનિદિધ્યાસનાયોગાત્ । મનને ચ
શ્રવણં
હેતુઃ , શ્રવણાભાવે તાત્પર્યાનિશ્ચયેન
શાબ્દજ્ઞાનાભાવેન
શ્રુતાર્થવિષયકયુક્તત્વાયુક્તત્વનિશ્ચયાનુકૂલમનનાયોગાત્ ।
એતાનિ ત્રીણ્યપિ જ્ઞાનોત્પત્તૌ કારણાનીતિ કેચિદાચાર્યા
ઊચિરે ।

અપરે તુ શ્રવણં પ્રધાનમ્ , મનનનિદિધ્યાસનયોસ્તુ
શ્રવણાત્
પરાચીનયોરપિ શ્રવણફલબ્રહ્મદર્શનનિર્વર્તકતયા
આરાદુપકારક -
તયાઽઙ્ગત્વમિત્યાહુઃ । તદપ્યઙ્ગત્વં ન
તાર્તીયશેષત્વરૂપમ્ ,
તસ્ય શ્રુત્યાદ્યન્યતમપ્રમાણગમ્યસ્ય પ્રકૃતે
શ્રુત્યાદ્યભાવેઽસમ્ભવાત્ ।
તથા હિ " બ્રીહિભિર્યજેત , " " દધ્ના જુહોતિ "
ઇત્યાદાવિવ
મનનનિદિધ્યાસનયોરઙ્ગત્વે ન કાચિત્ તૃતીયા શ્રુતિરસ્તિ ।
નાપિ " બર્હિર્દેવસદનં દામિ " ઇત્યાદિ મન્ત્રાણાં
બર્હિઃખણ્ડન -
પ્રકાશનસામર્થ્યવત્ કિઞ્ચિલ્લઙ્ગમસ્તિ । નાપિ

પ્રદેશાન્તરપઠિતસ્ય
પ્રગ્રસ્ય " અગ્નિષ્ટોમે પ્રવૃણક્તિ " ઇતિ વાક્યવત્
શ્રવણાનુવાદેન
મનનનિદિધ્યાસનવિનિયોજકં કિઞ્ચિદ્વાક્યમસ્તિ । નાપિ
" દર્શપૂર્ણમાસાભ્યાં સ્વર્ગકામો યજેત " ઇતિ
વાક્યાવગતફલ -
સાધનતાકદર્શપૂર્ણમાસપ્રકરણે પ્રયાજાદીનામિવ
ફલસાધનત્વે -
નાવગતસ્ય શ્રવણસ્ય પ્રકરણે મનનનિદિધ્યાસનયોરામ્નાનમ્
।

નનુ ' દ્રષ્ટવ્યઃ ' ઇતિ દર્શનાનુવાદેન શ્રવણે વિહિતે સતિ ફલવત્તયા શ્રવણપ્રકરણે તત્સન્નિધાવામ્નાતયોર્મનનનિદિધ્યાસનયોઃ પ્રયાજન્યાયેન પ્રકરણાદેવાઙ્ગતેતિ ચેત્ , ન , " તે ધ્યાનયોગાનુગતા અપશ્યન્ " ઇતાદિ શ્રુત્યન્તે ધ્યાનસ્ય દર્શનસાધનત્વેનાવગતસ્ય અઙ્ગાકાઙ્ક્ષાયાં પ્રયાજન્યયેન શ્રવણમનનયોરેવાઙ્ગત્વાપત્તેઃ । ક્રમસમાખ્યે ચ દૂરનિરસ્તે ।

કિઞ્ચ પ્રયાજાદિષ્વઙ્ગત્વવિચારઃ સપ્રયોજનઃ । પૂર્વપક્ષે વિકૃતિષુ ન પ્રયાજાદ્યનુષ્ઠાનમ્ ; સિદ્ધાન્તે તુ તત્રાપિ તદનુષ્ઠાનમિતિ । પ્રકૃતે તુ શ્રવણં ન કસ્યચિત્ પ્રકૃતિઃ , યેન મનનનિદિધ્યાસનયો - સ્તત્રાપ્યનુષ્ઠાનમઙ્ગત્વવિચારફલં ભવેત્ । તસ્માન્ન તાર્તીયશેષત્વં મનનનિદિધ્યાસનયોઃ , કિન્તુ તથા ઘટાદિકાર્યે મૃત્પિણ્ડાદીનાં સહકારિકારણતેતિ પ્રાધાન્યાપ્રાધાન્યવ્યપદેશઃ , તથા શ્રવણ - મનનનિદિધ્યાસનાનામપીતિ મન્તવ્યમ્ ।

સૂચિતં ચૈતદ્વિવરણાચાર્યૈઃ - " શક્તિતાત્પર્યવિશિષ્ટશબ્દાવધારણં પ્રમેયાવગમં પ્રત્યવ્યવધાનેન કારણં ભવતિ , પ્રમાણસ્ય પ્રમેયાવગમં પ્રત્યવ્યવધાનાત્ । મનનનિદિધ્યાસને તુ ચિત્તસ્યપ્રત્યગાત્મપ્રવણતા - સંસ્કારપરિનિષ્પન્ન - તદેકાગ્રવૃત્તિકાર્યદ્વારેણ બ્રહ્માનુભવહેતુતાં પ્રતિપદ્યેતે ઇતિ ફલં પ્રત્યવ્યવહિતકારણસ્ય શક્તિતાત્પર્યવિશિષ્ટ - શબ્દાવધારણસ્ય વ્યવહિતે મનનનિદિધ્યાસને તદઙ્ગે અઙ્ગીક્રિયતે । શ્રવણાદિષુ ચ મુમુક્ષૂણામધિકારઃ , કામ્યે કર્મણિ ફલકામસ્યાધિકારિત્વાત્ । મુમુક્ષાયાં ચ નિત્યાનિત્યવસ્તુવિવેકસ્યેહામુત્રાર્થફલભોગવિરાગસ્ય શમદમોપરતિતિતિક્ષાસમાધાનશ્રદ્ધાનાં ચ વિનિયોગઃ । અન્તરિન્દ્રિયનિગ્રહઃ

શમઃ । બહિરિન્દ્રિયનિગ્રહો દમઃ । વિક્ષેપાભાવ ઉપરતિઃ । શીતોષ્ણાદિ - દ્વન્દ્વશનં તિતિક્ષા । ચિત્તૈકાગ્રં સમાધાનમ્ । ગુરુવેદાન્તવાક્યેષુ વિશ્વાસઃ શ્રદ્ધા ।

અત્ર ' ઉપરમ ' - શબ્દેન સંન્યાસોऽભિધીયતે ;
તથા ચ સંન્યાસિનામેવ
શ્રવણાદાવધિકારઃ , ઇતિ કેચિત્ । અપરે તુ ' ઉપરમ ' - શબ્દસ્ય સંન્યાસવાચકત્વાભાવાત્ , વિક્ષેપાભાવમાત્રસ્ય ગૃહસ્થેષ્વપિ સમ્ભવાત્ , જનકાદેરપિ બ્રહ્મવિચારસ્ય શ્રૂયમાણત્વાત્ , સર્વાશ્રમસાધારણં શ્રવણાદિવિધાનમિત્યાહુઃ ।

સગુણોપાસનમપિ ચિત્તૈકાગ્ર્યદ્વારાનિર્વિશેષબ્રહ્મસાક્ષાત્કારહેતુઃ ।
તદુક્તમ્ -

" નિર્વિશેષં પરં બ્રહ્મ સાક્ષાત્કર્તુમનીશ્વરઃ ।
યે મન્દાસ્તેऽનુકમ્પ્યન્તેસવિશેષનિરૂપણૈઃ ॥

વશીકૃતે મનસ્યેષાં સગુણબ્રહ્મશીલનાત્ ।
તદેવાવિર્ભવેત્ સાક્ષાદપેતોપાધિકલ્પનમ્ ॥" ઇતિ ।
સગુણોપાસકાનાં ચ અર્ચિરાદિમાર્ગેણ બ્રહ્મલોકગતાનાં તત્રૈવ શ્રવણાદ્યુત્પન્નતત્ત્વસાક્ષાત્કારાણાં બ્રહ્મણા સહ મોક્ષઃ । કર્મિણાન્તુ ધૂમાદિમાર્ગેણ પિતૃલોકં ગતાનામુપભોગેન કર્મક્ષયે સતિ પૂર્વકૃતસુકૃતદુષ્કૃતાનુસારેણ બ્રહ્માદિસ્થાવરાન્તેષુ પુનરુત્પત્તિઃ । તથા ચ શ્રુતિઃ - " રમણીયચરણા રમણીયાં યોનિમાપદ્યન્તે , કપૂયચરણાઃ કપૂયાં યોનિમાપદ્યન્તે " ઇતિ । પ્રતિષિદ્ધાનુષ્ઠાયિનાં તુ રૌરવાદિનરકવિશેષેષુ તત્તત્પાપોચિત - તીવ્રદુઃખમનુભૂય શ્વશૂકરાદિતિર્યગ્યોનિષુ સ્થાવરાદિષુ ચોત્પત્તિઃ , ઇત્યલં પ્રસઙ્ગાગતપ્રપઞ્ચેન ।

નિર્ગુણબ્રહ્મસાક્ષાત્કારવતસ્તુ ન લોકાન્તરગમનમ્ , " ન તસ્ય પ્રાણા ઉત્ક્રામન્તિ " ઇતિ શ્રુતેઃ , કિન્તુ યાવત્પ્રારબ્ધકર્મક્ષયં સુખદુઃખે અનુભૂય પશ્ચાદપવૃજ્યતે ।

નનુ " ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્ દૃષ્ટે પરાવરે " ઇત્યાદિ શ્રુત્યા , " જ્ઞાનાગ્નિઃ સર્વકર્માણિ ભસ્મસાત્ કુરુતે તથા " ઇત્યાદિ સ્મૃત્યા ચ જ્ઞાનસ્ય સકલકર્મક્ષયહેતુત્વનિશ્ચયે

સતિ પ્રારબ્ધકર્માવસ્થાનમનુપપન્નમિતિ ચેત્ , ન । " તસ્ય
તાવદેવ ચિરં યાવન્ન વિમોક્ષ્યે , અથ સમ્પત્સ્યે " ઇત્યાદિ શ્રુત્યા ,
" નાભુક્તં ક્ષીયતે કર્મ " ઇત્યાદિ સ્મૃત્યા ચોત્પાદિતકાર્યકર્મ -
વ્યતિરિક્તાનાં સઞ્ચિતકર્મણામેવ જ્ઞાનવિનાશ્યત્વાવગમાત્ ।

સઞ્ચિતં દ્વિવિધમ્ - સુકૃતં દુષ્કૃતં ચ । તથા ચ શ્રુતિઃ -
" તસ્ય પુત્રા દાયમુપયન્તિ , સુહૃદઃ સાધુકૃત્યામ્ , દ્વિષન્તઃ
પાપકૃત્યામ્ " ઇતિ ।

નનુ બ્રહ્મજ્ઞાનાન્મૂલાજ્ઞાનનિવૃત્તૌ તત્કાર્યપ્રારબ્ધકર્મણોઽપિ
નિવૃત્તેઃ કથં જ્ઞાનિનાં દેહધારણમુપપદ્યતે ઇતિ ચેત્ , ન ,
અપ્રતિબદ્ધજ્ઞાનસ્યૈવાજ્ઞાનનિવર્તકતયા પ્રારબ્ધકર્મરૂપ-
પ્રતિબન્ધકદશાયામજ્ઞાનનિવૃત્તેરનઙ્ગીકારાત્ ।

નન્વેવમપિ તત્ત્વજ્ઞાનાદાદેકસ્ય મુક્તૌ સર્વમુક્તિઃ સ્યાત્ ,
અવિદ્યાયા એકત્વેન તન્નિવૃત્તૌ ક્વચિદપિ સંસારાયોગાદિતિ
ચેત્ , ન , ઇષ્ટાપત્તેરિત્યેકે । અપરે તુ એતદ્દોષપરિહારાયૈવ
" ઇન્દ્રો માયાભિઃ " ઇતિ બહુવચનશ્રુત્યનુગૃહીતમવિદ્યાયાનાનાત્વ -
મઙ્ગીકર્તવ્યમિત્યાહુઃ । અન્યે તુ એકૈવાવિદ્યા , તસ્યાશ્ચાવિદ્યાયા
જીવભેદેન બ્રહ્મસ્વરૂપાવરણશક્તયો નાના ; તથા ચ યસ્ય
બ્રહ્મજ્ઞાનં તસ્ય બ્રહ્મસ્વરૂપાવરણશક્તિવિશિષ્ટાવિદ્યાનાશઃ ,
ન ત્વન્યં પ્રતિ , ઇત્યુપગમાત્ નૈકમુક્તૌ સર્વમુક્તિઃ । અત એવ
" યાવદધિકારમવસ્થિતિરાધિકારિકાણામ્ " ઇત્યસ્મિન્નધિકરણે
અધિકારિપુરૂષાણામુત્પન્નતત્ત્વજ્ઞાનાનામિન્દ્રાદીનાં દેહધારણા -
નુપપત્તિમાશઙ્ક્ય અધિકારાપાદકપ્રારબ્ધકર્મસમાપ્ત્યનન્તરં
વિદેહકૈવલ્યમિતિ સિદ્ધાન્તિતમ્ । તદુક્તમાચાર્યવાચસ્પતિમિશ્રૈઃ -

" ઉપસનાદિસંસિદ્ધિતોષિતેશ્વરચોદિતમ્ ।
અધિકારં સમાપ્યૈતે પ્રવિશન્તિ પરં પદમ્ ॥ " ઇતિ ।

એતચ્ચૈકમુક્તો સર્વમુક્તિરિતિ પક્ષે નોપપદ્યતે । તસ્માદેકાવિદ્યાપક્ષેઽપિ
પ્રતિજીવમાવરણભેદોપગમેન વ્યવસ્થોપપાદનીયા ।

તદેવં બ્રહ્મજ્ઞાનાન્મોક્ષઃ । સ ચાનર્થનિવૃત્તિર્નિરતિશય -
બ્રહ્માનન્દાવાપ્તિશ્ચેતિ સિદ્ધં પ્રયોજનમ્ ।

ઇતિ વેદાન્તપરિભાષાયાં પ્રયોજનપરિચ્છેદઃ ।

ઇતિ ધર્મરાજ અધ્વરીન્દ્ર વિરચિતા

વેદાન્ત પરિભાષા સમાપ્તા ॥

*Vedanta Paribhasha*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*